Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

YOGINIHRIDAYA TANTRA.

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

YOGINIHRIDAYA TANTRA.

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इति संकेतपद्धत्युक्तरीत्या इच्छादिका मूर्धाद्यवयवाः गुणाः सत्त्वरजस्तमांसि स्वावयवभूतैर्नवभिः ग्रहरूपा च सा देवी ॥

ज्ञानकर्मेन्द्रियैरपि ।
तदर्थैरेव देवेशि करणैरान्तरैः पुनः ॥
प्रकृत्या च गुणेनापि पुंस्त्वबन्धेन चात्मना ।
नवग्रविग्रहा जाता ॥

ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि बोधकरणानि, कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थानि, तेषामर्थाः शब्दस्पर्शरूपरसगन्धाः, वचनादानगमनविसर्गानन्दाश्च, करणानि मनोहंकारचित्तानि अन्तरङ्गानि, प्रकृतिः गुणसाम्यमव्यक्तम्, गुणो गुणतत्त्वं सुखदुःखमोहानां मूलं, पुंस्त्वबन्धः आत्मा पुरुषतत्त्वम् । तदुक्तं स्वच्छन्दसंग्रहे

"एभिर्मायादिभिः षड्भिः परिपूर्णः पशुः पुमान् ।
भुङ्क्ते भोगान्यया देवि तथा पुरुषसंज्ञकः ॥
सैव मायार्थभोगार्थं पशोरव्यक्तसंज्ञकम् ।
मूलप्रकृतिर्विश्वस्य गुणत्रितयरूपकम् ॥
अभूत्तस्यां प्रकृत्यां तु गुणतत्त्वं बभूव ह ॥
तद्दुःखसुखमोहानां मूलं सत्त्वं रजस्तमः ॥
बुद्धिव्यापारनियतरूपं व्यक्तगुणात्मकम् ।
विषयात्मा तु बुद्धिः स्याद्गुणास्तत्र प्रयोजकाः ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

गुणत्रयानुसारेण त्रिधा कर्मानुसारतः ।
तया बुद्ध्या समुद्भूतोऽहंकारस्त्रिप्रकारकः ॥
सर्वजीवनसंरम्भरूपेण कमलासनम् ।
वैकृतस्तत्र भेदेन त्रिधा कर्मानुसारतः ॥
सोऽयं तैजसवैकारिभौतिकाख्यः स्वरूपतः ।
विकाराश्च स्वभेदाश्च वाय्वादीन्द्रियसंभवैः ॥
वाचिकाद्याः स्फुरीष्यानि तत्र तत्र नियच्छिभिः ।
प्राप्नोति सा तु विद्याभिरवस्थाभिर्नगात्मजे ।
संकल्पकारणं वक्ष्मि ज्ञानकर्मेन्द्रियाणि च ।
भूततन्मात्रशब्दस्पर्शरूपरसगन्धकाः ॥
जाता दृगादीन्द्रियाणां व्यापारः परमेश्वरि ।
श्रोत्रत्वक्चक्षूरसनाघ्राणान्येतानि पञ्च च ॥
बुद्धीन्द्रियाणि व्यापारस्तेषामेकैकतः क्रमात् ।
शब्दस्पर्शरूपरसगन्धानां ग्रहणं प्रिये ॥
कर्मेन्द्रियाणां वाक्पाणिपादपायुउपस्थकः ।
वचनादानगमना उत्सर्गानन्दकं क्रमात् ॥
कर्मेन्द्रियाणां व्यापारः पञ्चानामपि कीर्तितः ।
एतानि दश बाह्यानि करणान्यान्तरं त्रयम् ॥
मनो बुद्धिरहंकारमन्तःकरणसंज्ञकम् ।"

इति । एतैः स्वावयवैः संभूतैः सप्तविंशतितत्त्व-
विग्रहा ।

योगिनीनामथोच्यते
त्वगादिधातुनाथाभिर्डाकिन्यादिभिरप्यसौ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

वर्गाष्टकनिविष्टाभिर्योगिनीभिश्च संयुता ॥
योगिनीरूपमास्थाय राजते विश्वविग्रहा ।
योगिनीरूपेण विहरति । यथैव वक्ष्यति
"अष्टाष्टकं च कर्तव्यं वित्तशाठ्यविवर्जितम् ।
त्वमेव तासां रूपेण क्रीडसे विश्वमोहिनीति" ॥

प्राणापानौ समानश्चोदानव्यानौ तथा पुनः
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः ।
जीवात्मा परमात्मा चेत्येते ताभिः स्वरूपिणी ॥
प्राणादिधनञ्जयान्ता दश वायवो जीवात्मोक्तलक्षणः
पशुः परमात्मा "एष ते अन्तर्याम्यमृत" इत्युपनिषदुक्तः
सर्वभूतानामन्तर्यामी एतैर्द्वादशाभिः ताभिः स्वरूपिणीति ॥
गणेशेत्यादिपदं विद्यापदेऽपि योजयति
अकथादित्रिपङ्क्त्यात्मा तार्तीयादिक्रमेण च ।
सा गणेशो महाविद्या परावागादिवाङ्मयी ॥
अकारहकारसामरस्यरूपा परावागादि वचो यासां
ताः पश्यन्तीमध्यमावैखर्यो वाचः चतस्रः परावागा-
दिवचः । तदुक्तं संकेतपद्धत्यां
"अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः ।
हकारोऽन्त्यकलारूपो विमर्शाख्यः प्रकीर्तितः ॥"
अनयोः सामरस्यं यत् परस्मिन्महसि स्फुटम् ।
वामाद्यैः पिण्डितो योऽसौ ववणः परिकीर्तितः ॥
अकारस्य शिवो रौद्री वक्त्रं वामा प्रकीर्तिता ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अम्बिका वाहुरित्युक्ता ज्येष्ठा चैवायुधं स्मृता ॥
अ इच्छाधिकलारूपः पञ्चधा यो व्यवस्थितः ।
अवर्णः सर्ववर्णानां न पृथग्भासते बहिः ॥
इच्छा शिरः प्रदेशः स्यात् क्रिया च तदधोगता ।
ज्ञानं पादगतं तस्य शान्ता हार्धार्धमध्यगा ॥
अष्टधा नाहतः प्रोक्तः शून्यादिप्रतिभेदतः ।
शून्यं स्पर्शस्तथा नादो ध्वनिर्बिन्दुस्तथैव च ॥
शक्तिबीजं ज्ञं चेति अष्टधा नाहतः स्मृतः ।
चत्वारिंशन्नवसंख्यो हतः स परिकीर्तितः ॥
लकारः कथितो योऽसौ संयोगाद्द्विविधः स्मृतः ।
समष्टिव्यष्ट्याख्यमेवं हि मातृकापीठमुत्तमम् ॥
अनाहतहतैर्मन्त्रैस्त्रिभिर्भेदैः समन्ततः ।
स्थितो योऽसौ महीपीठलकाराख्यो जयत्यसौ ॥”

इति । एवमेतत्परादिचतुर्विधतया वाङ्मयी अक्षरवि-
मर्शरूपौ “स्वांशौ भित्त्वा चतुष्कलौ” इत्यादि सौभाग्य-
सुधोदयप्रतिपादितरीत्या परापश्यन्तीमध्यमावैखरीम-
यत्वात् विद्याया अकथादित्रिपङ्क्त्यात्मतार्तीयादिक्र-
मेण च अकथादीत्यादिशास्त्रेण अकारथककारथकारैः
त्रिभिः संबध्यते, अादयः षोडश विसर्गान्ताः, कादयः
तान्ताः, थादयः सान्ताः षोडश, एवमकथादिवर्णा-
त्मकतार्तीयादिकामराजवाग्भवक्रमेण अकारादिप-
ङ्क्तिमयं कामराजं, थकारादिपङ्क्तिमयं वाग्भव इति क्रमेण
पङ्क्तिशब्दो गणपरः चतुर्विधमातृकामयत्वात् अक-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यादि वैखर्यादिगणत्रयबीजत्रयात्मा सोऽयं महाविद्यागणेशो भूदित्यर्थः ॥

बीजबिन्दुध्वनीनां च त्रिकूटेषु ग्रहात्मिका ॥

कूटशब्दोऽत्र स्वरपिण्डपरः । यथोक्तमभियुक्तैः "कूटेषु त्रिषु कार्येगौरवपूर्णादीकारमुक्तान् क्रमात्" इति सौभाग्यविद्याक्षरीयं तेषु बीजबिन्दुध्वनीनां च बीजमीकारान्तं विद्याक्षरजातं, बिन्दुर्हंकलक्षणः, ध्वनिर्नादः, बीजबिन्दुध्वनीनां चेति तृतीयार्थे छान्दसः प्रयोगः। कूटत्रयबीजानि त्रीणि बिन्दवस्त्रयो नादास्त्रय इति नवभिर्ग्रहात्मिका विद्येत्यर्थः ॥

हृल्लेखात्रयसंभूतैस्तिथिसंख्यैस्तथाक्षरैः ।
अन्यैर्द्वादशभिर्वर्णैरेकनक्षत्ररूपिणी ॥

बीजत्रयशिखरवर्ति ह्रींकारे त्रयं तत्संभूतैस्तथाक्षरैः हकाररेफाकारैः बिन्दुनादात्मकैः तिथिसंख्याकैः पञ्चदशभिरन्यैः हृल्लेखात्रयवर्जितैः द्वादशवर्णैः कूटत्रयावयवैः। एवं पञ्चदशभिर्द्वादशभिर्वर्णैः सर्वैः नक्षत्ररूपिणीत्यर्थः ॥

विद्यान्तभूतशक्त्याद्यैः शाक्तैः षड्भिस्तथाक्षरैः ।
योगिनीत्वं च विद्यायाः

विद्यायाः पञ्चदशाक्षर्या अन्तर्भूताः शक्तयो हृल्लेखात्मिकाः तदाद्याश्च लकारास्त्रयः एतैः षड्भिरक्षरैः विद्याया योगिनीत्वं योगिन्यश्च डाकिन्याद्याश्च षट् ॥

राशित्वं चान्त्यवर्जितैः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

विद्याया इत्यर्थः। विद्यायाः पञ्चदशाक्षर्या शक्त्या कूटत्रयोल्लिखः तद्वर्जितैः द्वादशभिर्वर्णैः राशित्वं भवेदित्यर्थः। राशयोऽपि द्वादशमेषाद्याः॥

उक्तमर्थं चक्रे निर्दिशति

एवं विश्वप्रकारा च चक्ररूपा महेश्वरी।

एवमुक्तरीत्या योजितगणेशादिविश्वप्रकारा महेश्वरी त्रिपुरसुन्दरी चक्ररूपा भवेदित्यर्थः। देवतामन्त्रविद्यापक्षेष्वेव चक्रपक्षे तु गणेशत्वादिकं योज्यमित्यर्थः। योजनप्रकारस्तु सकाराद्यावर्णमध्यत्रिकोणरेखाया गणेशत्वं नवचक्रग्रहरूपत्वं वृत्तत्रयचतुर्दशकोणबहिर्दशाररूपेण नक्षत्ररूपत्वं, अष्टकोणैः ब्राह्म्यादियोगिनीत्वं, पञ्चशक्तिचतुर्वह्निपद्मद्वयभूगृहैः राशित्वं चेति॥

पुनश्च पूर्वोक्तलक्षणमेवार्थं गुरुशिष्ययोरपि घटयति

देव्या देहो यथा प्रोक्तो गुरुदेहस्तथैव च।
तत्प्रसादाच्च शिष्योऽपि तद्रूपः संप्रकाशते॥

देव्यास्त्रिपुरसुन्दर्या देहः स्वेच्छागृहीतो विग्रहो यथा प्रोक्तः एकादशाधिकशतदेवतात्मतया पुनः "गणेशत्वं महादेव्या" इत्यादिना "गृणते तत्त्वमात्मीय"मित्याद्यभियुक्तवचनोक्तरीत्या देवतारूपस्यैव गुरुत्वात् गुरुदेहेऽपि ~~[illegible]~~ यथा देव्या देहे गणेशत्वादिकं योजितं तद्रूपो गुरुदेहोऽपि तथैव इत्यर्थः। तत्प्रसादात्

"स्वप्रकाशवपुषा गुरुः शिवो
यः प्रसीदति पदार्थमस्तके।
तत्प्रसादमिह तत्त्वबोधनं
प्राप्तभेदमुपयाति भावतः॥"

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

इत्यस्मदुक्तरीत्या प्राप्तगुरुप्रसादः शिष्यः तद्रूपो देवता-
रूप एव संप्रकाशते इति यथा देव्या देहे गणेशत्वादिकं
योजितं तथैव शिष्यदेहेऽपि योजनीयमित्यर्थः ॥

कौलिकमर्थमुपसंहरति

इत्येवं कौलिकार्थस्तु कथितो वीरवन्दिते ।

इति शब्दः प्रसङ्गपरिसमाप्तिपरः । एवं शब्दः पूर्वोक्ता-
नुवादपरः शेषं स्पष्टम् ॥

क्रमप्राप्तं सर्वरहस्यार्थमाह

तथा सर्वरहस्यार्थं कथयामि तवानघे ।

तथा शब्दः पूर्वोक्तार्थपरामर्शार्थः सर्वरहस्यार्थं पू-
र्वोक्तसर्वेभ्यो रहस्यं परमाप्तिरूपत्वात् ।

सर्वरहस्यार्थमेवाह

मूलाधारे तडिद्रूपे वाग्भवाकारतां गते ।
अष्टात्रिंशत्कलायुक्तपञ्चाशद्वर्णविग्रहा ॥
विद्या कुण्डलिनीरूपा मण्डलत्रयभेदिनी ।
तडित्कोटिनिभा भव्या बिसतन्तुनिभाकृतिः ॥
व्योमेन्दुमण्डलासक्ता सुधास्रोतःस्वरूपिणी ।
सदा व्याप्तं जगत्कृत्स्नं सदानन्दस्वरूपिणी ॥
यथा स्वात्मेति बुद्धिस्तु रहस्यार्थे महेश्वरी ।

मूलाधारे पूर्वोक्तलक्षणे तडिद्रूपे विद्युत्सवर्णवर्णे वा-
ग्भवाकारतां गते वाचः परापश्यन्तीमध्यमावैखर्यः
ताभिर्वाग्भिर्भवतीति वाग्भवं त्रिकोणं । तदुक्तमत्रैव "आ-
त्मनः स्फुरणमित्यादि क्रियाशक्तिस्तु रौद्रीयं वैखरी विश्व-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

विग्रहा" इत्यन्तेन तदाकारतां गते तद्रूपेण परिणते अष्टा-
त्रिंशत्कलेति वह्नेर्धूम्राद्या दश, सूर्यस्य तापिन्याद्या द्वाद-
श, सोमस्यामृताद्याः षोडश कलाः, एवमेता अष्टात्रिं-
शत्कला ताभिर्युक्तैः पञ्चाशद्वर्णैः अकारादिक्षकारान्तैः
वह्निकलाभिः दशभिर्युक्ता यादयो दश वर्णाः, सूर्यस्य
कलाभिर्द्वादशभिर्युक्ता क्रमोत्क्रमात् काद्याश्चतुर्विंश-
तिर्वर्णैः सोमकलाभिः षोडशभिर्युक्ता अकाराद-
यः षोडश स्वराः, एवमेते पञ्चाशद्वर्णा विग्रहो यस्याः
सा। तथा सौभाग्यविद्यायाश्च "स्वरव्यञ्जनरूपेण षट्त्रिं-
शत्तत्त्वरूपिणी" इति पूर्वोक्तरीत्या षट्त्रिंशदवयवपञ्च-
दशाक्षरमयी वैखर्यात्मिका विद्या कुण्डलिनीरूपा ~~तस्याः~~

"तस्या मध्ये वह्निशिखात्मना योर्ध्वे व्यवस्थिता।
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा॥"

इत्यस्मदुक्तरीत्या भुजङ्गभोगसदृशी ज्योतिर्लता मण्ड-
लत्रयभेदिनी मण्डलत्रयमाधारहृदयभ्रूमध्यस्थितानां
वह्निसूर्यसोममण्डलानां त्रयं तद्भेदिनी तत्त्रयं भित्त्वा
तन्मध्यमार्गेण कुलं व्रजेदुमुद्यतेत्यर्थः। तडित्कोटिनि-
भप्रख्या तडितां कोटीनां निभा सदृशा प्रख्या प्रभा
यस्याः सा बिसतन्तुनिभाकृतिः बिसतन्तुवत् सूक्ष्म-
रूपा व्योमेन्दुमण्डलासक्ता

"ललाटार्धं समारभ्य कपालोर्ध्वावसानकम्।
द्वाङ्गुलोर्ध्वं शिरोदेशः परं व्योम प्रकीर्तितम्॥"

इति स्वच्छन्दसंग्रहोक्तरीत्या परव्योम्नि यदिन्दुमण्डलं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

चिच्चन्द्रमण्डलबिम्बं तत्रासक्ता, सुधास्रोतः स्वरूपिणी, त-
द्विगलदमृतप्रवाहरूपा, सदाव्याप्तं जगत् कृत्स्नं सदा का-
लत्रयेऽपि जगत् कृत्स्नं षट्त्रिंशत्तत्त्वात्मकं व्याप्तं ययेति
शेषः। सदानन्दस्वरूपिणी सदानन्दः परमशिवः स्व-
रूपं यस्याः अस्तीति सदानन्दस्वरूपिणीति। एषा चिन्म-
यी कुण्डलिनी शक्तिः स्वात्मेति बुद्धिः तदात्मतया स-
मावेशो रहस्यार्थः इत्यर्थः। तदुक्तं चतुःशतीशास्त्रे

"यदुल्लसति शृङ्गाटपीठात् कुटिलरूपिणी।
शिवार्कमण्डलं भित्त्वा द्रावयन्तीन्दुमण्डलम्॥
तदुद्भवामृतस्यन्दपरमानन्दनन्दिता।
कुलयोषित् कुलं त्यक्त्वा परं पुरुषमेति सा॥
निर्लक्षणं निर्गुणं च कुलरूपविवर्जितम्।
ततः स्वच्छन्दरूपा तु परिगृह्य जगत्पतिम्॥
तेन मार्गेण संतुष्टा पुनरेकाकिनी सती।
रमते हेयमव्यक्ता त्रिपुरा व्यक्तिमागता॥"

इति॥

क्रमप्राप्तं महार्थतत्त्वं वक्तुं प्रतिजानीते

महातत्त्वार्थ इति यत्तच्च देवि वदामि ते।

स्पष्टम्॥

महातत्त्वार्थमाह

निष्कले परमे सूक्ष्मे निर्लक्ष्ये भाववर्जिते।
व्योमातीते परे ~~क~~ तत्त्वे प्रकाशानन्दविग्रहे।
विश्वोत्तीर्णे विश्वमये तत्त्वे स्वात्मनि योजनम्॥

निष्कले निरवयवे कलाः अवयवा महद्योपि मही

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यदि परमे सूक्ष्मे अणोरणीयसि निर्लक्ष्ये करणेन्द्रियागोचरे भाववर्जिते "भाव ..... अतीन्द्रियं च यल्लक्ष्यं सुकेन" इति चिद्गगनचन्द्रिकोक्तरीत्या भावनातीते गम्ये व्योमातीतं पूर्वोक्तलक्षणं तदतीते परे तत्त्वे सकलतत्त्वातीतसकलसत्त्वार्थे परमार्थे प्रकाशानन्दविग्रहे प्रकाशो ज्योतिषां ज्योतिरनुत्तरमानन्दः तौ प्रकाशानन्दौ विग्रहो यस्य विश्वोत्तीर्णे विश्वमुक्तलक्षणं तदुत्तीर्णे विश्वमये

"देशकालपदार्थात्मतया यद्यद्वस्तु यथा तथा ।
तत्तद्रूपेण या भाति तां श्रये संविदं कलाम् ॥"

इति प्रामाणिकोक्तरीत्या तत्तदात्मतावभासमाने तत्त्वे "तत्त्वमसी"त्युपनिषद्वाक्यार्थपरमार्थपरविद्याप्रदायकपरशिवरूपनिजगुरुप्रतिबोधितनिर्मलस्वभावे स्वात्मनि योजनं तदेकतानप्रवेशो महातत्त्वार्थ इत्यर्थः ॥

नन्वेवंविधलक्षणं स्वात्मतत्त्वं केन प्रमाणेनानुमीयते इत्यत आह

तदा प्रकाशमानत्वं तेजसां तमसामपि ।
अविनाभावरूपत्वं तस्माद्विश्वस्य सर्वतः ॥

यदा स शिवः सर्वप्राणिनां चित्ते परिस्फुरति तदा "आत्मा मनसा संयुज्यते मन इन्द्रियेणेन्द्रियमर्थेन" इति तन्त्रान्तरोक्तरीत्या तेजसां सूर्यादीनां, तमसां घटादीनां, ज्ञानानां प्रकाशमानत्वं चित्ते तत्तदात्मनि शिवे प्रथमं परिस्फुरति सत्येव तत्तदिन्द्रियद्वारा तत्तदर्थानां परिस्फुरणम् । अत्र श्रुतिः । "तमेव भान्तमनुभाति सर्वम्" इति । तस्मात् सर्वतः सर्वस्य विश्वस्योक्तलक्षणस्याविनाभावरूपत्वम्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अविना भवतीति अविनाभावः । कोऽर्थः विश्वमिदं उद्भूतापे- त्प्रतीतिकं दृश्यत्वात् यथा शशविषाणमित्यन्वयव्य- तिरेकसिद्धेनानुमानप्रमाणेनानुमीयते इत्यर्थः ॥

अथ वाऽलं प्रमाणचिन्तया जडप्रमाणानामपि तदनु- प्रवेशेनैव प्रमाणत्वात् तेषामपि यतद्भावं यत्नेन साध- यितुमलं तस्य स्वप्रकाशत्वादित्याह

प्रकाशते महातत्त्वं दिव्यक्रीडारसोज्ज्वले ।

तत्त्वं देशकालाकारैरनवच्छिन्नत्वं प्रकाशते स्वत एव तेन विना न किमपि प्रकाशयितुमलम् तस्यैव प्रकाशनेन सर्वाणि प्रकाशन्ते इति । अत्र श्रुतिः

"न तद्भासयते सूर्यो न शशाङ्को न पावकः ।"

इति "तस्य भासा सर्वमिदं विभाति" इति च । अभियुक्तवचोऽपि

"स्वयं चात्मैकतानानामतिरेवात्र साक्षिणी ।
किं प्रमाणवचोभिस्तु स्वप्रकाशे चिदात्मनि ॥
नहि वैकर्तनं ज्योतिर्दीपालोकमपेक्षते ॥"

इति । दिव्यक्रीडारसोज्ज्वले दिवि भवो दिव्यः परशिवः तस्य क्रीडा विश्वसर्जनादिव्यवहारक्रिया चिच्छक्तिः तयोः रसः सामरस्यं तेनोज्ज्वले नित्यशिवशक्तिसाम- रस्यप्रणयनप्रतीत्या देवी इत्यर्थः ॥

ननु महातत्त्वार्थज्ञानस्य फलं यागादिकरणमिव दे- हान्तरदेशान्तरकालान्तरभावि प्रत्ययं नेत्याह

निरस्तसर्वसंकल्पविकल्पस्थितिपूर्वकः ।
रहस्यार्थो महापुत्रः सद्यः प्रत्ययकारकः ॥

इदमहं करिष्यामीति मानसं कर्म संकल्पः, एवं मया कर्तव्यमेवं नेति कोटिद्वयावलम्बनं विकल्पः, शिव-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्वातन्त्र्यभावे तु तावेत्तौ निवृत्तौ विज्ञानमात्रतः तदुभयनिरासादेव मनसः स्थैर्यं स्थितिर्जायते तत्पूर्वको ऽहमात्मकः कर्मानर्हाकर्णनायोग्यः अत एव महागुप्तः न कस्यापि कथितः अत्यन्तयत्नेन रक्षितः सद्यः प्रत्ययकारकः एतदाकर्णनेन शिवोऽहमस्मीति प्रत्ययः सद्य एव समुदेतीत्यर्थः ॥

नन्वयमर्थः कुत्र स्थितः कुत्र वा दृष्टः किं वा तस्य फलमित्यत आह

महातन्त्रार्णवे दृष्टः शङ्का तत्र न पार्वति ।
विद्यापीठनिबन्धेषु संस्थितो दिव्यसिद्धिदः ॥

विद्यैव पीठं शिवयोर्विश्रान्तिस्थानं तन्निबध्यते येषु तानि निबन्धानि तदवयवभूतानि वाग्भवकामराजशाक्ताख्यानि बीजानि तेषु विद्यापीठनिबन्धेषु संस्थितो दिव्यसिद्धिदः "सकले विषुसंज्ञे च" इत्यत्र उक्तरीत्या बीजत्रयशिखरवर्ति बिन्द्वर्धचन्द्ररोधिनीनादनादान्तशक्तिव्यापिकासमनोन्मनानां क्रमेणानुसंधीयमानेषु उन्मन्यन्ते देशकालानवच्छिन्नपरचिदात्मकमहातत्त्वार्थः संस्थित इत्यर्थः । तदुक्तं स्वच्छन्दसंग्रहे

"या चोक्ता समना शक्तिस्तदूर्ध्वे उन्मना स्मृता ।
नात्र कालकलाभानं न तत्त्वं न च देवता ॥
स्वनिर्वाणं परं शुद्धं रुद्रवक्त्रं तदुच्यते ।
शिवशक्तिरिति ख्याता निर्विकल्पा निरञ्जना ॥
तत्त्वातीतं वरारोहे वाङ्मनोतीतगोचरम् ।
सुनिष्कलं च सकलं नीरूपं निर्विकल्पकम् ॥
निर्द्वन्द्वं परमं तत्त्वं शिवाख्यं परमं पदम् ।"

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इति हे देवि उन्मन्यन्ते निरस्तनिखिलक्रमे महाशून्ये भवती-
ति दिव्यः परमेश्वरः पूर्वोक्तः, तस्य सिद्धिः स्वाभेदेन प्रति-
ज्ञानं तल्लक्षणं परमप्रयोजनं ददातीति दिव्यसिद्धिदः, म-
हाज्ञानार्णवे इष्टः तादृशः परमशिवसमाधिरेव महाज्ञानं
तदेवार्णवः निस्तरङ्गापारपरामृतपरिपूर्णत्वात् तस्मिन् इष्टः
शिवाहंभावभावनया भावितः। कोऽर्थः — अयं परमशिवशा-
स्त्रलक्षणो महातत्त्वार्थः सौभाग्यविद्याबीजत्रयशिखरव-
र्त्युन्मन्यवसाने भूमाववस्थितः तथाविधफलदो मया
नित्यं समाधिदशायां निरीक्ष्यते, अतस्तत्रार्थे शङ्का त्वया
न कार्या यथार्थदर्शी यथादृष्टार्थवादी अत्राह तत्त्वार्थो
महागुप्त इत्युक्तम् ॥

तर्हि कीदृशैर्लभ्यते इत्यत आह

कौलाचारपरैर्देवि पादुकाभावनापरैः ।
योगिनीमेलनोद्युक्तैः प्राप्तदिव्याभिषेचनैः ॥
शङ्काकलङ्कविगतैः सदामुदितमानसैः ।
पारम्पर्येण विज्ञातरहस्यार्थविशारदैः ॥

लभ्यत इति। कुलं शरीरं महाप्रयोजनहेतुतया ज्ञेयं
येषां ते कौलाः। तदुक्तं स्वच्छन्दसंग्रहे

"कुलज्ञानमतो वक्ष्ये कौलिकानां हिताय वै ।
यस्य विज्ञानमात्रेण योगोपायाश्च योगिनः ॥
सुगुप्ताः सिद्धयः सर्वा भवन्ति सुलभाः प्रिये ।
शरीरं कुलमित्युक्तमिति तेषामयादरः ॥
सर्वेषामपि शिष्याणां दीक्षितानामपि प्रिये ।
सर्वावस्थागतानां च साधारणमतं शृणु ॥
गुरुभक्तिश्च शान्तिश्च पूजा श्रद्धा क्षमा धृतिः ।"

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इति स्वच्छन्दसंग्रहोक्तरीत्या समयाचारपरैः पादुकाभावनापरैः

"स्वप्रकाशशिवमूर्तिरेकिका
तद्विमर्शतनुरेकिका तयोः।
सामरस्यवपुरिष्यते परा
पादुका परशिवात्मनो गुरोः॥"

इत्यस्मदुक्तरीत्या प्रकाशविमर्शतत्त्वसहिततया श्रीगुरुपादुकाद्वन्द्वभावनापरैः योगिनीमेलनोद्युक्तैः

"यत्र यत्र मिलिता मरीचयः
तत्र तत्र विभुरेव जृम्भते।
तत्सतां हि नियमावलम्बनं
ध्यानपूजनकथा विडम्बना॥"

इति प्रमाणवचनोक्तरीत्या मातृमानमेयसंविदो योगिन्यः तासां मेलनमन्तर्मुखीभावेन परप्रमातृविश्रान्तिः तत्रोद्युक्तैः। अथवा ब्राह्म्याद्यष्टकार्चनार्थं सामयिकशान्तिचक्रमेलनं प्राप्तदिव्याभिषेचनैः लब्धपरशिवाभिप्रायगुरुवराभिमन्त्रितचिद्रसमयकलशसलिलसेकैः ततः प्रक्षालितमलमयपाशैः, अत एव शङ्काकलङ्कविगतैः इत्थं भवेन्नवेत्यनवधारणं शङ्का सैव कलङ्कः मालिन्यहेतुत्वात्, तस्माद्विगतैः अत एव सदामुदितमानसैः मेघावरणविगमात् यथा रवेः स्वरूपं परिस्फुरति तथा मलपाशविगमात् सदैवेषां मनसि प्रमोदलक्षणं परशिवरूपं प्रकाशते; तैरित्यर्थः। पारम्पर्येण विज्ञातरहस्यार्थविशारदैः लभ्यते शिवादिगुरुपर्यन्तपरम्परया विदितसकलरहस्यार्थपर्यालोचनया पटुमतिभिः महातत्त्वार्थो लभ्यते इत्यर्थः॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

कौलाचारपरैरित्याद्युक्तगुणविहीनैरयमर्थो न लभ्यते इति प्रागप्यपूर्वमाह ..

नान्यथा देवि त्वां मर्त्या लभन्ते रस ।
स्पृहम् ॥

ननु मास्तु गुरुपारम्पर्यक्रमः पुस्तकपठनादिना व्युत्पत्तिबलेन किंचिन्मात्रपरिज्ञानेन गर्विताः तेषां समयलोपेन संकेतपरिज्ञानं संपादयितुं शक्यते इत्यत आह

पारम्पर्यविहीना ये ज्ञानमात्रेण गर्विताः ।
तेषां समयलोपेन विकुर्वन्ति मरीचयः ॥

ये पारम्पर्यविहीनाः शब्दव्युत्पत्तिबलेन किंचिन्मात्रपरिज्ञानगर्विताः, समयः "मदनं तदधः शक्तिरित्यादि-समयशास्त्रविहितसकलमन्त्रादिसंकेतपरिज्ञानाद्युच्चारणादिक्रमलोपेन विकुर्वन्ति मरीचयः "सर्वपीठनिवासिन्यः सर्वगाः चिन्मरीचयः । भैरव्यो भरिताकारा रक्षन्तु कुलमातरः" इति प्रामाणिकवचनोक्तरीत्या ब्राह्म्याद्या डाकिन्याद्याश्च त्वगादिधातुदेवता विकुर्वन्ति विकारं कुर्वन्ति स्वस्वधातूद्रेकविरूपजननेन तेषां देहं नाशयन्तीत्यर्थः ॥

ननु कस्मिन्दिने कस्मिन् नक्षत्रे कस्मिन् वारे कौलाचारक्रमेण योगिनीमीलनं कार्यमित्यत आह

यस्तु दिव्यरसास्वादमोदमानविमर्शनः ।
देवतातिथिनक्षत्रवारेऽपि च विवस्वतः ।
मरीचीन् मीलयत्येव कारणानन्दघूर्णितः ।

यस्तु कौलाचारपरो योगी दिव्यरसास्वादमोदमानविमर्शनः दिवि परे व्योम्नि भवतीति दिव्यः परशिवः तेन रसः सामरस्यं तस्यास्वादोऽनुभवः तेन मोदमान-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

विमर्शन: विमर्शने मनोवृत्तिर्यस्य सः परशिवैकपरामर्श-
परिस्फुरदकृत्रिमानन्दकेवलः पश्चात् कारणानन्दपूर्ण-
तः वक्ष्यमाणार्घ्यविशुद्धिं विधाय परामृतभूतया मदिरया-
संपादितानन्दो योगिनीदेवता तिथौ चतुर्दश्यष्टम्योः पूर्वं
नक्षत्रं देवतानक्षत्रमेव वक्ष्यति

"नित्यं पुण्यदिने वारे शौरे परमेश्वरि।
गुरोर्दिने स्वनक्षत्रे चतुर्दश्यष्टमीषु च॥
चक्रपूजां विशेषेण योगिनीनां समाचरेत्।"

इति। मरीचीन् प्रीणयत्येव मरीचीनुक्तरूपान् चिन्मरीचीन्
प्रीणयत्येव तर्पयत्येव एवकारो योगव्यवच्छेदनपरः
उक्तकालेषु सर्वयोगिनीप्रीणनं कुर्यात् अन्यथा प्रत्यवा-
यो भवेदित्यर्थः॥

सर्वदा च विशेषेण लभते पूर्णबोधनम्।

कालविशेषकथनं नैमित्तिकपूजाद्योतनार्थम्। सर्वदा-
प्रत्यहं मरीचिप्रीणनं कुर्यादेव। एवकारेणाप्यन्वयः। नि-
त्यार्चनाकरणे प्रत्यवायोऽस्तीति तात्पर्यम्।

"नित्यार्चनायां लुप्तायां . . . . . . ।"

इति स्वच्छन्दसंग्रहोक्तरीत्या प्रायश्चित्तस्य कर्तव्यत्वविधा-
नात् अकरणे प्रत्यवाय एव भवति। करणे तु फलमस्ती-
त्याह लभते पूर्णबोधनमिति। पूर्णबोधोऽत्र विमर्शबोधल-
क्षणः "स्वात्मशंभुरवतिष्ठते निष्कम्" इत्यस्मदुक्तरीत्या
निरावरणचिद्रूपस्वात्मशंभुत्वं प्राप्नोतीत्यर्थः॥

ननु पूर्णबोधभावः केन कियता कालेन संप्रा-
प्यते इत्यत आह

एवं भावस्तु देवेशि दैशिकेन्द्रप्रसादतः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

महाज्ञानमयो देवि सद्यः संप्राप्यते नरैः ।

एवंभावः पूर्णबोधत्वं दैशिकेन्द्रप्रसादतः यस्य गुरुणा कं-टाक्षपातेन पाशजालं विच्छिद्यते स परशिवः केवलो दैशि-केन्द्रतत्प्रसादतः ।

"स्वप्रकाशवपुषा गुरुः शिवो
यः प्रसीदति पदार्थमण्डले ।
तत्प्रसादमिह तत्त्वबोधनं
प्राप्य मोदमुपयाति भावुकः ॥"

इत्यस्मदुक्तरीत्या तत्प्रसादग्रहणेन महाज्ञानमयो नि-रावरणचिन्मयः कौलाचारपरैरित्यादि पूर्वोक्तविशेष-णविशेषितैः सद्यो दैशिकेन्द्रप्रसादसमकालमेव एवं सं-प्राप्यते ॥

सङ्केतमुपसंहरति

एवमेतत्परं ज्ञानं विद्यार्णवसमगोचरम् ।
देवि गुह्यं प्रियेणैव व्याख्यातं दुर्गषड्विधम् ॥
~~यस्य~~ सद्यो यस्य प्रबोधेन वीरचक्रेश्वरो भवेत् ॥

एवमुक्तप्रकारेण एतत् परं परिपूर्णबोधलक्षणं पर-शिवतत्त्वपदज्ञानं विद्यायाः अर्णो वर्णाः पञ्चदश त एवा-गमो महार्थबोधकत्वात् तद्गोचरं तदर्थतया व्याख्यातं, "यद्वेत्ता त्रिपुराकारो भवेदित्यारभ्य एतत्पर्यन्तेन षड्विधो भावार्थः संप्रदायार्थः" इत्यादिना प्रतिपादितषट्प्रकारः देवि प्रकाशविमर्शसामरस्यरूपे परशिवे दुर्गं दैशिकेन्द्रक-टाक्षपातविहीनैरप्राप्यस्वरूपं, सद्यो यस्य प्रबोधेन षड्विधा-र्थस्य बोधेन वीरचक्रेश्वरो भवेत् इदन्तारिपोरहमि रण-ङ्गने प्रलयप्रतिपादनपरा वीराः, तेषां चक्रं समूहः तस्ये-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

श्वरः परमशिवः पूर्वोक्तषड्विधार्थविज्ञानं समय एव पर-
शिवो भवेदित्यर्थः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीपुण्यानन्दशि-
ष्यामृतानन्दयोगिप्रवरविरचितायां योगिनीहृदयदीपिका-
यां मन्त्रसंकेतो नाम द्वितीयः पटलः ॥ २ ॥

क्रमप्राप्तं पूजासंकेतं वक्तुं प्रतिजानीते

पूजासंकेतमधुना कथयामि तवानघे ।

स्पष्टम् ॥

श्रोतृप्रवृत्तये फलमाह

यस्य प्रबोधमात्रेण जीवन्मुक्तः प्रमोदते ॥

परादित्रिविभेदतः

यस्य पूजासंकेतस्य प्रबोधमात्रेण
केवलपरिज्ञानेनैव जीवन्मुक्तो जीवन्नेव मुक्तः सन् शि-
वोऽहमस्मीति प्रमोदते, परशिवाहन्तामतिरेव प्रमोदहेतुः ॥

पूजासंकेतमारभते

तव नित्योदिता पूजा त्रिभिर्भेदैर्व्यवस्थिता ।

प्रकाशात्मनो मम विमर्शांशकैः विमर्शरूपिण्याः तव
नित्योदिता पूजा नित्यं प्रत्यहं उदिता विहिता त्रिभिर्भे-
दैर्व्यवस्थिता ॥

पूजानामान्याह

परा चापरा गौरि तृतीया च परापरा ॥

प्रथमा पूजा परोत्तमा । तदुक्तं संकेतपद्धत्याम्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

"न पूजा बाह्यपुष्पादिद्रव्यैर्या विहिता मिया ।
स्वे महिम्न्यद्वये धाम्नि सा पूजा या परास्थितिः ॥"

इति । अपरा द्वितीया पूजा भेदप्रमया बाह्यचक्रावरणार्चनरूपा तु अधमा 'न पूजा बाह्ये'त्यादिवचनात् । तृतीया पूजा परापरा बाह्यस्यान्तरे धाम्नि अद्वयचिद्रूपभावनामयी मध्यमा परापरात्मकत्वात् ॥

तासां लक्षणानि क्रमेणाह

प्रथमाऽद्वैतभावस्था सर्वप्रपञ्चगोचरा ।

"आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन" इति पूर्वोक्तपरिपाट्या सर्वेषामिन्द्रियाणां ये व्यापारास्तेषां गोचरीभूतः । कोऽर्थः

"यत्र यत्र मनो याति बाह्ये वाभ्यन्तरे प्रिये ।
तत्र तत्र परावस्था व्यापकत्वात् क यास्यसि[1] ॥
यत्र यत्राक्षमार्गेण चैतन्यं व्यज्यते प्रभोः ।
तस्य तन्मात्ररूपत्वाच्चिल्लयाद्भरिता स्थितिः ॥"

इति विज्ञानभट्टारकोक्तरीत्या बाह्यस्य चिल्लयलक्षणाद्वैतप्रथा परा पूजेत्यर्थः ॥

द्वितीया चक्रपूजा च सदा निष्पाद्यते मया ।

द्वितीयाऽपरा पूजा चतुरस्रादिबिन्द्वन्तः श्रीचक्रनिवासावरणदेवतानामतोऽपरा पूजेत्यर्थः । सदा निष्पाद्यते मया सदा प्रत्यहं सर्वज्ञेनापि मया निष्पाद्यते क्रियते प्रबोधकत्वात् अभेदप्रतीतेः । तथा परा पूजा सदा सर्वैरपि ज्ञानिभिः कार्येत्यर्थः । अन्यथा द्वैतप्रसक्तप्रतिषेधः स्यात् । न च तथा युक्तं । तदुक्तं तन्त्रान्तरे

"लब्धरूपं क्वचित्किंचित्तादृगेव निषिध्यते ।
विधानमन्तरेणातो निषेधस्य च संभवः ॥"

इति ॥

---

१ ख० पु० . यास्यति इति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

परापरापूजामाह

एवं ज्ञानमये देवि तृतीया स्वप्रथामयी ।

एवं ज्ञानमये पूर्वोक्ताद्वैतभावनामये धाम्नि स्वप्रथामयी बाह्यस्यार्थप्रपञ्चस्यावरणार्चनद्वारा वह्नाविव ज्ञानमयता विश्रान्तिः तृतीया परा पूजा । तदुक्तमभियुक्तैः

"प्रकाशैकघने धाम्नि विकल्पान् प्रसवादिकान् ।
निक्षिपाम्यर्चनद्वारा वह्नाविव घृताहुतीः ॥"

इति ॥

पूजाविधानमाह

उत्तमा सा परा ज्ञेया विधानं शृणु सांप्रतम् ।

परा पूजा उत्तमत्वकथनादपरा परापरयोरधमत्वं मध्यमत्वं चोपलक्षयति । सा ज्ञेया यथाज्ञानं कार्या अपरा पूजा पश्चाद्वक्ष्यते अस्य ज्ञेयत्वात् परत्वमत एव चोत्तमत्वं चेत्यर्थः । सांप्रतं ज्ञेयायाः पूजाया विधानं शृणु ॥

विधानमेव विवृणोति

महापद्मवनान्तःस्थे वाग्भवे गुरुपादुकाम् ।
आप्यायितजगद्रूपां परमामृतवर्षिणीम् ॥
संचिन्त्य ॥

महापद्मं ब्रह्मरन्ध्राधोमुखसितसहस्रदलाकुलकमलं पद्मदलैराकुलत्वाद्वनमिति । तदुक्तं स्वच्छन्दसंग्रहे

"यद्वादूर्ध्वं कुलं पद्मं सहस्रारमधोमुखम् ।
श्वेतं च निष्कलात्मकं मध्यं चासंख्यसुशक्तिकम् ॥ ७१
व्यापिनी केवला शुभ्रादमृतौघप्रवर्षिणी ।
महापद्मवनं चैवं समना तस्य चोपरि ॥"

इति । तस्यान्तः कर्णिकामध्यं तत्स्थे वाग्भवरूपिणि पूर्वोक्तरीत्या वाचः परापश्यन्तीमध्यमावैखर्यो भवन्त्यस्मादिति वाग्भवं त्रिकोणं, तत्र गुरुपादुकां "गुणते

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तत्त्वमात्मीयमि"त्यादिपूर्वोक्ताभियुक्तवचनोक्तरीत्या विश्वगुरोः परमशिवस्य "स्वप्रकाशशिवमूर्तिरेकिके"त्यस्मदुक्तरीत्या त्रिभेदवतीम् आप्यायितचराचरां परमामृतवर्षिणीं निरन्तरनिबिडचिद्रसामृतवर्षिणीं संचिन्त्यात्मतया विचिन्त्य ॥

गुरुपादुकापरामर्शानन्तरमान्तरमेव प्रसादस्वीकारमाह

परमाद्वैतभावनामदघूर्णितः ।

परमः परमशिवस्तेनाद्वैतभावना सोऽहमस्मीति समावेशरूपा सैव मद इत्युच्यते मदहेतुत्वात्, तत्कृतेन मदेन घूर्णितो मदितः "स्वप्रकाशशिववपुषा गुरु"रित्याद्यस्मदुक्तरीत्या परशिवाद्वैतभावनालक्षणगुरुप्रसादस्वीकारशोल्लसत्परमानन्दपरवश इत्यर्थः ॥

प्रसादस्वीकारानन्तरमान्तरजपमेवाह

दहरान्तरसंसर्पन्नादालोकनतत्परः ।

दहरं वियदम्बरं वेश्मभूतं "हृत्पुण्डरीकं पुरमध्यसंस्थितम्" इति "दहरोऽस्मिन्नन्तराकाश" इति श्रुत्या हृदयाम्बुजमध्यगतमाकाशं दहरमित्युच्यते। दहरमेव दहरं तदन्तरे संसर्पन्नादो दहरान्तरसंसर्पन्नादः तस्यालोकनं विभावनं तत्र तत्परः । तदुक्तमभियुक्तैः

"आनन्दलक्षणमनाहतनाम्नि देशे
नादात्मना परिणतं तव रूपमीशे ।
प्रत्यङ्मुखेन मनसा परिचीयमानं
शंसन्ति नेत्रसलिलैः पुलकैश्च धन्याः ॥"

इति ।

"संयम्येन्द्रियसंचारं प्रोच्चरन् नादमान्तरम् ।
एवमेव जपः प्रोक्तो न तु बाह्यजपो जपः ॥"

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इत्यभियुक्तवचनोक्तरीत्या आत्मानादानुसंधानलक्षणं जपं कुर्यात् ॥

ननु नानाविधोच्चारलक्षणं बाह्यं जपं कुर्यादित्याह

विकल्परूपसंजल्पविमुखोऽन्तर्मुखः सदा ।

विकल्परूपाणां नानाविधरूपाणां मन्त्राणां संजल्प उच्चारस्तल्लक्षणं जपविमुखः

"जपः सोऽन्तः स्वयं नादो मन्त्रात्मा जप ईरितः ।"

इति । तादृशमपि ध्यानं कुर्यादित्याह अन्तरिति "तत्र प्रत्ययैकतानता ध्यानमिति" योगशास्त्रोक्तरीत्या विजातीयप्रत्ययान्तरितसजातीयप्रत्ययप्रवाहलक्षणेन ध्यानेन सदा शश्वदन्तःस्फुरितेनान्तर्मुखः परशिवो भूयादित्यर्थः । तदुक्तं विज्ञानभैरवे

"ध्यानं या निष्कला चिन्ता निराकारा निराश्रया
न तु ध्यानं शरीरस्य मुखहस्तादिकल्पना ॥"

इति ॥

चित्कल्लोलासदलितसंकोचस्त्वतिसुन्दरः ।

"चिदम्बुधिमहाभङ्गभिन्नसंकोचसुन्दरः" इत्यस्मदुक्तरीत्या परिकलितपूर्णभावः अत एवातिसुन्दरः महात्रिपुरसुन्दरीनामधेयपरचित्कल्लोलासादपरमसुन्दरप्रेमास्पदपरशिवाभिन्न इत्यर्थः ॥

पूजामप्येतादृशीं कुर्यादित्याह

इन्द्रियप्रीणनैर्द्रव्यैर्विहितस्वात्मपूजनः ॥

इन्द्रियाणि श्रोत्रादीनि तेषां प्रीणनानि द्रव्याणि विशिष्टशब्दस्पर्शरूपरसगन्धवन्ति तैर्विहितं स्वात्मदेवतायाः पूजनं येन स तथाविधः । तदुक्तं सुव्याम्नायरहस्यविधौ

"इन्द्रियद्वारसंग्राह्यैर्गन्धाद्यैरात्मदेवताम् ।

१ स्व० पु० जप्य इति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्वभावेन समाराध्य ज्ञातुः सोऽयं महोत्सवः ।"

इति । "जग्धिपानकृतोल्लासरसानन्दविजृम्भणात् ।
भावयेद्भरितावस्थां महानन्दस्ततो भवेत् ॥"

इति विज्ञानभट्टारकोक्तरीत्या श्रोत्रादीन्द्रियविषयशब्दाद्यनुभवजनितानन्दानां महानन्देन समरसीकरणं परापूजेत्यर्थः ॥

अथ परापूजां वक्तुं तदङ्गभूतं बाह्यन्यासमाह

न्यासं निवर्तयेद्देहे षोढान्यासपुरस्सरम् ॥

षोढान्यासपुरःसरेणेत्यभिसूचिते देहे निपद्यत इति शेषः । षोढा षट्प्रकारको न्यासः ॥

तत्प्रकारमाह

गणेशैः प्रथमो न्यासो द्वितीयस्तु ग्रहैर्मतः ।
नक्षत्रैस्तु तृतीयः स्याद्योगिनीभिश्चतुर्थकः ॥
राशिभिः पञ्चमो न्यासः षष्ठः पीठैर्निगद्यते ।

न्यासो न्यासजातं जातावेकवचनम् ॥

षट्प्रकारन्यासमाहात्म्यफलमाह

षोढा न्यासस्तु संप्रोक्तः सर्वत्रैवापराजितः ।
एवं यो न्यस्तगात्रस्तु स पूज्यः सर्वयोगिभिः ॥
नास्त्यस्य पूज्यो लोकेषु पितृमातृमुखो जनः ।
स एव पूज्यः सर्वेषां स स्वयं परमेश्वरः ॥
षोढान्यासविहीनं यं प्रणमेद्देव पार्वति ।
सोऽचिरान्मृत्युमाप्नोति नरकं प्रतिपद्यते ॥

प्रोक्तोऽयं षोढान्यासः सर्वत्र सर्वलोकेष्वपि अपराजितः अप्रतिहतसामर्थ्यात् छिन्नपाशत्वात् स्वयमेव परमेश्वरः, अत एव लोकेषु जनेषु स एव योगिभिः पूज्यः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

किं बहुना सर्वेषामपि पूज्यः नास्त्यस्य पूज्यः कोपि लो-
केऽस्ति। यदि चेमं बलादन्यस्मै प्रणमयति सोऽमृतो भवेत् न-
रकं च प्रतिपद्यत इत्यर्थः।

षोढान्यासप्रकारं वक्तुं प्रतिजानीते
षोढान्यासप्रकारं च कथयामि तवानघे ॥

स्पष्टम्॥

तत्प्रकारमाह

विघ्नेशो विघ्नराजश्च विनायकशिवोत्तमौ ।
विघ्नहृद् विघ्नकर्त्ता च गणनायक एव च ॥
एकदन्तो द्विदन्तश्च गजवक्त्रो निरञ्जनः ।
कपर्दवान् दीर्घमुखः शङ्कुकर्णो वृषध्वजः ।
गजनाथो गजेन्द्रश्च शूर्पकर्णस्त्रिलोचनः ॥
लम्बोदरो महानादश्चतुर्मूर्तिः सदाशिवः ।
आमोदो दुर्मुखश्चैव सुमुखश्च प्रमोदकः ॥
एकपादो द्विजिह्वश्च शूरवीरश्च षण्मुखः ।
वरदो वामदेवश्च वक्रतुण्डो द्विरुण्डकः ॥
सेनानीर्ग्रामणीर्मत्तो विमत्तो मत्तवाहनः ।
जटी मुण्डी तथा खड्गी वरेण्यो वृषकेतनः ॥
भक्तिप्रियो गणेशश्च मेघनादो गणेश्वरः ॥

तान्येतानि तावद्व्याख्येयानीति तेषां ध्यानमाह

तरुणारुणसंकाशान् गजवक्त्रांस्त्रिलोचनान् ।
पाशाङ्कुशवराभीतिहस्तान्शक्तिसमन्वितान् ॥

तरुणादित्यसवर्णान् गजवक्त्रमिव वक्त्रं येषां ते गज-
वक्त्रास्तान्, ऊर्ध्वं करयोः पाशाङ्कुशौ अधः करयोः
वराभये दधानान् पुष्ट्यादिभिः समन्वितान्। अत्र सू-
चितानां नाम्नामागमान्तरपद्धतिषु चोक्तत्वान्न वदामः॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

न्यासस्थानान्याह

एतांस्तु विन्यसेद्देवि मातृकास्थानकस्थिये ।

एतान् गणेशान् मातृकास्थानवत् मातृकास्थानेश्वरी न्यासस्थानेषु न्यसेदित्यर्थः ॥

ग्रहन्यासमाह

स्वरैस्तु सहितः सूर्यं हृदयाधः प्रविन्यसेत् ।
बिन्दुस्थाने सुधासूतिं यादिवर्णचतुष्टयैः ॥
भूपुत्रं लोचनद्वन्द्वे कवर्गाधिपतिं शिवे ।
हृदये विन्यसेच्छुक्रं चवर्गाधिपतिं पुनः ॥
हृदयोपरि विन्यस्य टवर्गाधिपतिं बुधम् ।
बृहस्पतिं कण्ठदेशे तवर्गाधिपतिं शिवे ॥
नाभौ शनैश्चरं चैव पवर्गेशं सुरेश्वरि ।
वक्त्रे शाधिचतुर्वर्णैः सहितं राहुमेव च ॥
क्षकारसहितं केतुं पादौ देवेशि विन्यसेत् ॥

स्वरैरकारादिविसर्गान्तैः षोडशभिः सहितं नाभ्यादौ सूर्यं हृदयाधो विन्यस्य बिन्दुस्थाने ललाटे, यत्रोक्तं "दीपाकारोर्ध्वमात्रश्च ललाटे तत्र दृश्यते" इत्यादिना, सुधासूतिं चन्द्रमसं यादिवर्णचतुष्टयैः यर लवैर्विन्यसेदित्यर्थः । भूपुत्रमङ्गारकं लोचनद्वन्द्वे कवर्गस्योपरिस्थितमधिपतिं विन्यसेत् हृदये वक्षसि, स्पष्टमन्यत् पादौ देवेशि विन्यसेदित्यन्तम् ॥

नक्षत्राणां स्थानानि न्यासं चाह

ललाटे दक्षनेत्रे च वामे कर्णद्वये पुनः ।
पुटयोर्नासिकायाश्च कण्ठे स्कन्धद्वये पुनः ॥
पश्चात् कूर्परयुग्मे च मणिबन्धद्वये तथा ।
हस्तयोर्नाभिदेशे च कटिबन्धे ततः परम् ॥
ऊरुयुग्मे तथा जान्वोर्जङ्घयोश्च पदद्वये ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ज्वलत्कालानलप्रख्या वरदाभयपाणयः ॥
नतिपाण्योऽश्विनीपूर्वाः सर्वाभरणभूषिताः ।
एतास्तु विन्यसेद्देवि स्थानेष्वेषु सुरार्चिते ॥

कटिबन्ध इति कटिबन्धयोरिति द्वन्द्वपरम्, अन्यथा सप्तविंशतिसंख्या न घटते। कर्णद्वय इति दक्षिणादितः इत्तनेत्रे वामे चेति क्रमस्योपक्रान्तत्वात्। वरदाभयपाणयः नतिपाणय इत्युक्त्या बाहुचतुष्टयं गम्यते। शेषं सुगमम्॥

योगिनीन्यासमाह

विशुद्धौ हृदये नाभौ स्वाधिष्ठाने च मूलके ।
आज्ञायां धातुनाथाश्च न्यसेद्वा डादिदेवताः ॥
अमृतादियुताः सम्यग्[१]धातवश्च सुरेश्वरि । [स्थातव्या]

विशुद्धौ तालमूले धातवः त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि तेषां नाथाः स्वामिन्यो डादिदेवताः डाकिनीशाकिनीलाकिनीकाकिनीराकिनीहाकिन्यः, अमृतादियुताः स्वच्छन्दसंग्रहोक्ता यथा

"अमृता प्रथमा देवि द्वितीया कर्षिणी मता ।
इन्द्राणी तु तृतीया स्यादीशानी च चतुर्थिका ॥
पञ्चमी स्यादुमा देवि षष्ठी चैवोर्ध्वकेशिनी ।
सप्तमी ऋकशिखा प्रोक्ता ऋषा चाष्टमिकी मता ॥
लृका नवमिका प्रोक्ता लृषा स्याद्दशमी मता ।
एकादशीति सा चैकपदा द्वादशिका शिवे ॥
ऐश्वर्याभिरता पश्चादोङ्कारी तु त्रयोदशी ।
चतुर्दश्यौषधात्मा स्यात् पञ्चाधिकदशात्मिका ॥
षोडशी त्वक्षरा देवि प्रोक्ताः षोडशकण्ठगाः ।
कालरात्री च विनीता गायत्री च ततः परम् ॥
घण्टाधारी च ज्ञानात्मा चन्द्रच्छाया जयापि च ।

१ क० पु ध्यातव्य इति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

[ञ] झङ्कारी ज्वालरूपा च टङ्कहस्ता ततः परम्।
ठङ्कारी द्वादशा ह्येता द्वादशारे समर्चयेत् ॥
डामरी चैव ढङ्कारी णामिनी तामिसी तथा।
थान्ता दाक्षायणी धात्री क्रिया नादा च पार्वती।
फेङ्कारी दशपत्रेषु पूर्वादीशान्तं संयजेत् ॥"

इति।

"बन्धनी भद्रकालीति महामाया यशस्विनी।
रक्ता लम्बोष्ठिका चैव पूजयेत् क्रमशः ~~शिवे~~ प्रिये ॥ [७]
चतुष्पत्रे च देवेशि वरदां च श्रियं तथा।
षण्डां सरस्वतीं चैव पूजयेत् क्रमशः शिवे ॥
इति। क्षमां हंसवतीं चैव पूजयेच्च द्विपत्रके ॥
एताभिः शक्तिभिर्युक्ता ध्यातव्याश्च सुरेश्वरि ॥"

इति न्यासं निर्वर्त्यैवं मातरो ध्यातव्या अपीत्यर्थः। ध्यानं निर्वर्त्य अथान्तरो न्यास इत्यर्थः। ध्यानं त्वागमान्तरादवगन्तव्यम् ॥

राशिन्यासमाह

पादे लिङ्गे च कुक्षौ च हृदये बाहुमूलके।
दक्षिणं पार्श्वमारभ्य वामपार्श्वावसानकम् ॥
मेषादिराशयो वर्णैर्न्यस्तव्याः सह पार्वति।

पादादिस्थानेषु दक्षिणादितो वामान्तं मेषादिराशयो
[७] वर्णैः ~~उकाराद्यैस्त्रिभिर्वर्णैः~~ मातृकाक्षरैः सह न्यस्तव्याः।
राशीनां वर्णा आगमान्तरसंवादान्मयोच्यते

"आद्यैश्चतुर्भिः सहितो मेषो दक्षपदे न्यसेत्।
उकाराद्यैस्त्रिभिर्वर्णैर्वृषभो लिङ्गदक्षिणे ॥
ऋकाराद्यैस्त्रिभिर्वर्णैर्मिथुनं कुक्षिदक्षिणे।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ओऔभ्यां सहितः सिंहो दक्षिणे बाहुमूलके ।
अंअः चवर्गतः कन्या ग्रीवा दक्षिणभागतः ॥
कवर्गेण तुला मूर्ध्नि वामे तद्बाहुमूलके ।
वृश्चिकश्च चवर्गेण टवर्गेण धनुर्हृदि ॥
वामे तवर्गसंयुक्तो मकरः कटिवामतः ।
पवर्गेण पुनः कुम्भो वामे लिङ्गप्रदेशतः ॥
यवर्गः क्षान्तमं … मीनः स्याद्वामपादके ।"

इति ॥

पीठन्यासमाह

पीठानि विन्यसेद्देवि मातृकास्थानके प्रिये ।

मातृकास्थानक इति जातावेकवचनम् । वैखरीवर्णस्थानेष्वित्यर्थः ॥

तेषां नामानि कथ्यन्ते शृणुष्वावहिता प्रिये ।

बहुत्वात् पीठनाम्नां ध्यातुमशक्यत्वात् सावधाना भवेत्यर्थः ॥

तन्न्यासमाह

कामरूपं वाराणसी नेपालं पौण्ड्रवर्धनः ।
पुरस्थिरं कान्यकुब्जं पूर्णशैलं तथार्बुदम् ॥
आम्रातकेश्वरैकाम्रं त्रिस्रोतः कामकोटकम् ।
कैलासं भृगुनगरं केदारं चन्द्रपुष्करम् ॥
श्रीपीठमेकवीरं च जालाख्यं मालवं तथा ।
कुलतं देविकोटं च गोकर्णं मारुतेश्वरम् ॥
अट्टहासं च विरजं राजगृहं महापथम् ।
कोलापुरमेलापुरमोङ्कारं च जयन्तिका ॥
उज्जयिन्यापि चित्रा च क्षीरकं हस्तिनापुरम् ।
उड्डीशं च प्रयागाख्यं षष्ठी मायापुरी तथा ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

जालन्धरं मलयं शैलं सह्यं गिरिवरं तथा ।
माहेन्द्रं वामनं चैव हिरण्यपुरमेव च ॥
महालक्ष्मीपुरोद्यानं छायाछत्रमतः परम् ।
एते पीठाः समुद्दिष्टा मातृकारूपकाः स्थिताः ॥"

मातृका रूपं येषां ते मातृकारूपकाः। क्रमेणादिक्षान्ताना-मेकैकं वर्णमेकैकस्यां नादावुक्त्वा तत्तत्स्थानेषु पीठानां न्यासं कुर्यादित्याह। षोढान्यासानन्तरमवश्यंभावित्वात् श्रीचक्रन्यासस्य तदिदानीं श्रीचक्रन्यासमाह

एवं षोढां पुरा कृत्वा श्रीचक्रन्यासमाचरेत् ।

एवमुक्तप्रकारेण षोढा षट्प्रकारं न्यासं पुरा कृत्वा श्रीचक्रन्यासमाचरेदित्यर्थः ।

श्रीचक्रन्यासस्य महाप्रयोजनत्वादनन्यकथितमपि स्वप्रियायै कथयामीत्याह

श्रीमत्त्रिपुरसुन्दर्याश्चक्रन्यासं शृणु प्रिये ।
यन्न कस्यचिदाख्यातं तनुशुद्धिकरं परम् ॥

"आनन्दकणभिक्षार्थं प्राकृस्पर्शादिमकणे ।
अटत्यविरतं येन तद्दारिद्र्यं विदुर्बुधाः ॥"

इत्यभियुक्तवचनोक्तरीत्या संकोचलक्षणदारिद्र्यनिवर्तिनी परिपूर्णपराहूपा संवित् श्रीरित्युच्यते। तद्वती त्रिपुरसुन्दरी त्रिपुरा तुरीयरूपत्वात् संकुचितभेदलक्षणप्रपञ्चापरपर्यायपरमदौर्भाग्यपरिपन्थिपरमाद्वैतसौभाग्यपदाधिरूढा सर्वप्राणिष्वात्मतया परप्रेमास्पदीभूता परचित्कला तस्याश्चक्रं शिवादिक्षितिपर्यन्ततत्त्वचक्रमयमविनाभावभूमिः तस्या न्यासं शृणु प्रिये मम प्रियायै ममैकरस्यलालसायै कथयामि, यन्न कस्यचिदाख्यातमिति रहस्यत्वात्, तनु-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शुद्धिकरं परं तनोः षट्त्रिंशत्तत्त्वात्मनः शुद्धिं परचित्पर्यव-
सानलक्षणां करोति, अत एवं परमुत्कृष्टमितरन्यासेभ्यः॥

श्रीचक्रन्यासप्रकारमाह·

चतुरश्रादिरेखायै नम इत्यादितो न्यसेत्।
दक्षांसपृष्ठपार्श्वस्फिक्पादाङ्गुलीषु च॥
वामाद्यङ्गुलिषु स्फिक्के पार्श्वे वामपृष्ठके।
सचूलमूलपृष्ठेषु व्यापकत्वेन सुन्दरि॥

"चतुरश्रादिरेखायै नम" इत्यादिमन्त्रेणादितो दक्षांस-
पृष्ठादिचूलपृष्ठान्तस्थानेषु दशसु व्यापकत्वेन न्यसेत्। द-
क्षांसस्य पृष्ठं पश्चाद्भागः। सचूलिमूलेति मूलं शिरः पुर-
स्ताद्भागः, स्फिक् ऊरुसंधिः। स्पष्टमन्यत्॥

एषु स्थानेषु न्यस्तव्याः शक्तीराह

अत्रैव स्थानदशके अणिमाद्या दश न्यसेत्॥

सिद्धीः

'अणिमा लघिमा गरिमा महिमा ईशित्वप्राकाम्यभुक्ती-
च्छाप्राप्तिसर्वकामाख्याः सिद्धयो दश॥

चतुरश्रमध्यमध्यरेखायां व्यापकमाह

तदन्तस्थ. तनुव्यापकत्वेन सुन्दरि।
चतुरश्रम[illegible]ध्यरेखायै नम इति विन्यसेत्॥

तदन्तः सिद्धिस्थानानामन्तर्देशे "चतुरश्रमध्यरेखायै नम"
इत्यादिमन्त्रेण तनुव्यापकत्वेन विन्यसेदित्यर्थः॥

चतुरश्रमध्यरेखायां न्यस्तव्याः शक्तीराह

तस्याः स्थानेषु देवेशि ब्रह्माण्याद्यास्तथाष्टसु।

तस्याश्चतुरश्रमध्यरेखाया अष्टसु स्थानेषु ब्रह्माण्याद्याः
ब्राह्मीमाहेश्वरीकौमारीवैष्णवीवाराहीन्द्राणीचामुण्डाम-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हालदम्य: तथा विन्यस्येत्येवं चान्वयः ।
तेषां स्थानाष्टकमाह
पादाङ्गुष्ठद्वये पार्श्वे दक्षे मूर्धन्यपार्श्वके ।
वामदक्षिणजान्वोश्च बहिरंसद्वये तथा ॥
स्पष्टम् ॥
चतुरश्रान्तरेखाव्यापकमाह
न्यस्तव्याश्चतुरश्रान्तरेखायै नम इत्यपि ।
विन्यसेद्व्यापकत्वेन पूर्वोक्तान्तस्य विग्रहे ॥
"चतुरश्रान्तरेखायै नम" इत्यादिमन्त्रेण विग्रहे देहे, पूर्वोक्तान्तस्य पूर्वोक्तानां ब्राह्म्यादिस्थानानामन्तर्देशेषु व्यापकत्वेन न्यस्तव्याः प्राक्तीराह·
तस्याः स्थानेषु दशसु मुद्राणां दशकं न्यसेत् ।
तस्याश्चतुरश्रान्तरेखाया दशसु स्थानेषु त्रिखण्डामुद्रासहितानां संक्षोभिण्यादिमुद्राणां दशकं न्यसेत् ॥
तासां स्थानान्याह
ब्रह्माण्याद्यष्टस्थानान्तस्तासामष्टौ न्यसेदधः ।
शिष्टे द्वे द्वादशान्ते च पादाङ्गुष्ठे च विन्यसेत् ॥
तासां मुद्राणां मध्येऽष्टौ मुद्रा ब्रह्माण्याद्यष्टस्थानानामन्तर्देशेषु अष्टसु विन्यस्य शिष्टे द्वे द्वादशान्तपादाङ्गुष्ठेषु विन्यसेत् । द्वादशान्तं षोडशान्तेन्दुमण्डलादधः सूर्यमण्डलस्थानम् । तदुक्तं स्वच्छन्दसंग्रहे
"षोडशान्तमिति ख्यातं व्योमस्थानेन्दुमण्डलम् ।
तथा तत्स्थानकं सूर्यबिम्बं द्वादशशाक्तिकम् ॥
द्वादशान्तं स्मृतं तेन स्थितं व्योमप्रदेशकम् ।
इति तेन बिन्दुतत्त्वं चतुष्पत्राम्बुजं च तत् ॥
सूर्यबिम्बमधश्चोर्ध्वे सार्धकाङ्गुलिदेशतः ।"
इति रीत्या ललाटस्थानबिन्दुतत्त्वोपरि स्थितं सूर्यमण्ड-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सूर्यमण्डलस्थानं ललाटोर्ध्वं द्वादशान्तपदेन लक्ष्यते ॥

षोडशदलपद्मचक्रव्यापकमाह

तदन्तः षोडशदलपद्माय नम इत्यधः ।
विन्यस्य तद्दले कामाकर्षिण्याद्याश्च विन्यसेत् ॥

तेषां चतुरक्षराणमन्तर्देव्याः शक्तीराह, "षोडशदलपद्माय नम" इत्यादि मन्त्रेण षोडशदलं दक्षिणतः श्रोत्रपृष्ठादिस्थानानि संस्पृश्य व्यापकं न्यसेदित्यर्थः । तद्दले जातावेकवचनत्वं तद्दलेषु कामबुद्ध्यहंकारशब्दस्पर्शरूपरसगन्धचित्तधैर्यस्मृतिनामबीजात्मामृतशरीराकर्षिण्यन्तां न्यसेत् ॥

तद्दलस्थानान्याह

दलानि दक्षिणं श्रोत्रं पृष्ठमंसञ्च कूर्परम् ।
करपृष्ठं चोरुजानुगुल्फपादतलं तथा ॥
वामपादतलान्येवं न्यसेदष्टकं मतम् ।

दलानीत्यादि तथेत्यन्तं स्पष्टम् । एवमुक्तप्रकारेण वामपादतलादि वामश्रोत्रपृष्ठान्तमेतदेवाष्टकं मतं स्थानाष्टकद्वयषोडशदलान्यपीत्यर्थः ॥

अष्टदलव्यापकमाह

तदन्तरे चाष्टदलपद्माय नम इत्यपि ।
विन्यसेत् ॥

तदन्तरे षोडशदलपद्मान्तरे "अष्टदलपद्माय नम" इति मन्त्रेण दक्षशङ्खादिस्थानानि संस्पृश्य व्यापकं न्यसेदित्यर्थः ॥

तद्दलान्याह

तद्दलेष्वेषु दक्षशङ्खे च जानुके ।
ऊर्वन्तगुल्फगुल्फोरुजानुशंखे च वामतः ॥

शंखजङ्घादिशब्दानां शरीरावयवावच्छिन्नानाम् अ-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ङ्गेषु प्रसिद्धत्वादवगतिः ॥

तद्दलेषु न्यस्तव्याः शक्तीराह

अनङ्गकुसुमाद्यास्तु शक्तीरष्टौ च विन्यसेत् ।

अनङ्गकुसुमानङ्गमेखलानङ्गमदनानङ्गमदनातुरानङ्ग-
रेखानङ्गवेगिन्यनङ्गाङ्कुशानङ्गमालिन्यः शेषं सुगमम् ॥

चतुर्दशारव्यापकमाह

तदन्तश्चतुर्दशारचक्राय नम इत्यथ ।
विन्यस्य ॥

तदनन्तरमष्टदलपद्मस्यान्तः "चतुर्दशारचक्राय नमः" इति-
मन्त्रेण चतुर्दशकोणस्थानानि ललाटादीनि संस्पृश्य
व्यापकं विन्यस्य ॥

चतुर्दशकोणेषु न्यस्तव्याः शक्तीराह

तस्य कोणेषु न्यसेच्छक्तीश्चतुर्दश ।
सर्वसंक्षोभिकाद्यास्तु ॥

सर्वसंक्षोभिण्याद्याः सर्वसंक्षोभिणी सर्वविद्राविणी आ-
कर्षिणी आह्लादकारिणी संमोहनी संस्तम्भनी जृम्भणी वशं-
करी रञ्जनी उन्मादिनी अर्थसाधनी संपत्तिपूरणी मन्त्र-
मयी द्वन्द्वक्षयकर्यः सर्वशब्दपूर्वाः ॥

तत्कोणानि प्रत्यक्षपूर्वकमाह

तस्य कोणानि वच्म्यहम् ।
ललाटे दक्षभागे च दक्षगण्डांसमध्यतः ॥
पार्श्वान्तरूरुजङ्घान्तर्वामजङ्घादि पार्वति ।
वामोरुवामपार्श्वे तु वामांसे वामगण्डके ॥
ललाटवामभागे च तथा वै पृष्ठ इत्यपि ।

दक्षभागे ललाटस्यैव ललाटे इति प्रकृतत्वात्, दक्ष-
गण्डे दक्षांसमध्यत इत्यर्थः। पार्श्वान्तरूरुजंघान्तरिति

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्रिभिरपि दक्षपार्श्वौ युज्यते। वामजङ्घादीत्यादिपार्श्वाच्छि-
ष्टार्थोऽस्य द्योतकः। वामांस इत्यत्रापि मध्य इति योज्यम्।
पृष्ठमिति शिरसः पृष्ठमवसेयं, दक्षवामयोः प्रथमं लला-
टोपादानात्। ललाटं शिरसः पुरस्ताद्भागः ॥

बहिर्दशारचक्रव्यापकमाह

ततो दशारचक्राय नम इत्यपि पार्वति ।

ततश्चतुर्दशकोणानन्तरं "दशारचक्राय नम" इति
मन्त्रेण दक्षांस्यादि दशकोणानि संस्पृश्य व्यापकमपि न्या-
सात् विन्यसेदिति योज्यम् ॥

दशारचक्रस्य कोणान्याह

तस्य कोणानि दक्षाक्षिनासिकानेत्रमूलके ।
कुक्षीशवायुकोणेषु जानुद्वययुगेषु च ॥
कुक्षिनैर्ऋत्यवह्न्याख्यकोणयोश्च - - - ।

तस्य दशारचक्रस्य कोणानि दशसु दक्षाक्ष्यादि-
स्थानेषु भावनीयानीत्यर्थः। कुक्षीशवायुकोणेषु
छान्दसत्वात् द्वित्वे बहुवचनम्। जानुद्वयमारभ्योरु-
द्वयपर्यन्तं कुक्षिशब्देन लक्ष्यते। तेन कुक्षेरुपरिभागः
प्राची, अधोभागः प्रतीची, दक्षिणवामपार्श्वे च दक्षि-
णोदीच्यौ बाहू लक्ष्येते। तेन वामबाहुमूलमीशकोणं,
वामोरुमूलं वायुकोणं, दक्षिणोरुमूलं नैर्ऋतकोणं।
सुगममन्यत् ॥

दशकोणेषु न्यस्तव्याः - न्यसेत्तु नः ।
सर्वसिद्धिप्रदाद्यानां शक्तीनां दशकं प्रिये ॥

सर्वसिद्धिप्रदाद्याः सर्वसिद्धिप्रदा सर्वसंपत्प्रदा प्रियं-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

करीमङ्गलकारिणी कामप्रदा दुःखविमोचिनी मृत्युप्रशमनी-
विघ्ननिवारिणी सर्वाङ्गसुन्दरी सर्वसौभाग्यदायिनी । शेषं स्पष्टम् ॥

अन्तर्दशारव्यापकमाह

तदन्तश्च दशारादिचक्राय नम इत्यपि ।
विन्यस्य ॥

तदन्तर्बहिर्दशारान्तर्दशारचक्राय नम" इति मन्त्रेण दक्षनासादिदशकोणानि संस्पृश्य व्यापकं विन्यस्य ॥

दशकोणेषु न्यस्तव्याः शक्तीराह

तस्य कोणेषु सर्वज्ञाद्याश्च विन्यसेत् ।

सर्वज्ञाद्याः सर्वज्ञा शक्तिः सर्वैश्वर्यप्रदायिनी सर्वज्ञानमयी सर्वव्याधिविनाशिनी सर्वाधारस्वरूपा पापहराऽऽनन्दमयी रक्षास्वरूपिणी सर्वेप्सितफलप्रदाः । स्पष्टमन्यत् ॥

तस्य कोणान्याह

दक्षनासा सृक्किणी च स्तनं वृषणमेव च ।
सेवनी वामवृषणं च स्तनसृक्किणिनासिका ॥
नासाग्रे चैव विज्ञेयं कोणानां दशकं तथा ।

स्पष्टम् ॥

अष्टकोणचक्रव्यापकमाह

तदन्तश्चाष्टकोणादिचक्राय नम इत्यपि ।
विन्यस्य ॥

तदन्तर्दशारान्तः अष्टकोणादिचक्राय नम" इति मन्त्रेण चिबुकाद्यष्टकोणानि संस्पृश्य व्यापकं विन्यस्य, अष्टकोणचक्रस्यादित्वम् त्रिकोणादीतरचक्रेभ्यः प्रथममुत्पन्नत्वात् ॥

अष्टकोणेषु न्यस्तव्याः शक्तीराह

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तस्य कोणेषु वशिन्याद्यष्टकं न्यसेत् ।

तस्याष्टारचक्रस्य कोणेषु वशिन्याद्याः वशिनीकामेश्वरीमोदिनीविमलारुणाजयिनीसर्वेश्वरीकौलिन्यः ॥

तस्य कोणाष्टकमाह

चिबुकं कण्ठहृदयनाडीनां चैव दक्षिणम् ।
शेषं पार्श्वचतुष्कं च मणिपूरादि वामकम् ॥
चतुष्टयं च पार्श्वानामेतत्कोणाष्टकं पुनः ।

चिबुकादीनां पार्श्वचतुष्कं दक्षिणं मणिपूरादि, मणिपूरकं नाभिस्थानं, नाभिहृदयकण्ठचिबुकानां पार्श्वचतुष्कं चैतत्कोणाष्टकम् ॥

अनन्तरमायुधावरणन्यासमाह

हृदयस्थत्रिकोणस्य चतुर्दिक्षु बहिर्न्यसेत् ।
शरचापौ पाशाङ्कुशौ ॥

कामेश्वरीकामेश्वरयोः शरचापौ पाशाङ्कुशौ चेत्यायुधचतुष्टयं मिलितं न्यसेत् । शरचापौ पाशाङ्कुशौ इति पुंस्त्रीभेदेन प्रत्येकं द्वन्द्वमित्यर्थः । अत्रैव वक्ष्यति "बाणान्ते भ्रुवोश्चापौ कर्णे पाशाङ्कुशं न्यसेत्" इति ।

आह

हृदये मध्यकोणं स्यात् ।

हृदयं मध्यस्थानं निम्नत्रिकोणाकारो हृदयस्य निम्नत्रिकोणाकारो हृदयस्य त्रिकोणमुच्यते तस्य चतुर्दिक्षु शरादिकामेश्वरीबाणान् न्यसेत् तत्त्रिकोणव्यापकमुच्यते ।

त्रिकोणाय नमस्तथा ।
विन्यस्य ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

"त्रिकोणाय नमः" इति मन्त्रेण, रेखात्रयं संस्पृश्य व्यापकं विन्यस्य ॥

त्रिकोणे न्यसेत्या देवीराह

तस्य कोणेषु अग्रदक्षोत्तरेषु च ।

कामेश्वर्यादिदेवीश्च मध्ये देवीं च विन्यसेत् ॥

तस्य त्रिकोणस्य अग्रदक्षोत्तरेषु कामेश्वरीवज्रेश्वरीभगमालिन्यः तासां कामेश्वर्यादिदेवीनां मध्ये देवीं च विन्यसेत् इति मध्ये बिन्दुश्रीचक्रे देवीं प्रकाशविमर्शसामरस्यरूपां त्रिपुरसुन्दरीं विन्यसेदित्यर्थः ॥

श्रीचक्रन्यासमुपसंहरति

एवं मयोदितं देवि न्यासो गुह्यतमक्रमः ।

स्पष्टम् ॥

अतस्त्वया गोप्यमित्याह

एतद्गुह्यतरं कार्यं त्वया वै वीरवन्दिते ।

स्पष्टं ॥

ननु किमेतत् कस्मैचिदपि कथनीयमित्याह

समयस्याय दातव्यं ।

समयस्याय कौलिकाय समयाचारनिष्ठाय देयं पशुमयाचारपराय न देयमित्याह ॥

ननु कौलिकसमयस्याय सर्वस्मै देयं, नेत्याह

नाशिष्याय कदाचन ।

समयस्यायापि अशिष्यायान्येन न देयम् मयापि एतत् त्वत्तदन्यतोपि न कस्यापि पुरा प्रकटीकृतमिति ।

अत आह

गुप्ताद्गुप्ततरं चेतत् तवाद्य प्रकटीकृतम् ।

गुप्ताद्गुप्ततरं रहस्यादपि अतिरहस्यत्वात्, एतत्तव म-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दंष्ट्रामूनाविमर्शात्मिकायाः त्रिपुरमायाः अपि यतो मया
अत्र प्रकटीकृतं पुरा न्यासे न प्रकटीकृतमिति तात्पर्यम् ॥

अस्यैव न्यासस्य पुनः प्रकारान्तरमाह

मूलदेव्यादिकं न्यासमणिमान्तं पुनर्न्यसेत् ।

पूर्वमणिमादिमूलदेव्यन्तं श्रीचक्रावरणदेवतान्यासमुक्त्वा इदानीं मूलदेव्याद्यणिमान्तं पुनः श्रीचक्रावरणदेवतानां न्यासं कुर्यादित्यर्थः ॥

मूलदेवतान्यासप्रकारमाह

शिरस्त्रिकोणपूर्वादि कामेश्वर्यादिकं न्यसेत् ।

"मूलदेव्यादिक"मित्यनेनैव शिरस्त्रिकोणमध्ये मूलदेव्याः प्रथमन्यासो ज्ञेयः, पश्चात् शिरस्त्रिकोणे शिरसः कपालमध्ये निम्नं त्रिकोणाकारमस्ति तद्बाले मृदुतरं दृश्यते। तत्र पूर्वादि कामेश्वर्यादिकं न्यसेदिति। आदिपदाद्दक्षिणोत्तरयोः ग्रहणम्। आदिपदाद्वज्रेश्वरीभगमालिनी, विन्यसेदित्यर्थः॥ न्यौ

आयुधावरणन्यासमाह

बाणान्नेत्रे भ्रुवोश्चापौ कर्णे पाशद्वयं पुनः ।
सृणिद्वयं तु नासाग्रे दक्षिणाद्यं तु विन्यसेत् ॥

बाणान् कामेश्वरकामेश्वर्योः नेत्रयोः, चापौ भ्रुवोः, पाशद्वयं कर्णयोः, सृणिद्वयं तु नासाग्रे नासोभयपार्श्वयोः, नेत्रे कर्णे नासाग्रे इति चैकवचनं प्रयोगे द्विवचनोपलक्षणं। दक्षिणाद्यमिति कथनात् एषु दक्षिणे कामेश्वरस्य वामे कामेश्वर्याश्च आयुधानि विन्यसेदित्यर्थः ॥

वशिन्याद्यावरणन्यासमाह

मुण्डमालाक्रमेणैव न्यसेद्वाग्देवताष्टकम् ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मुखं शिरस्तस्य मात्रा क्रमेणाष्टदिक्षु परितो वाग्देवता-
ष्टकाधिष्ठात्रीणां वशिन्यादीनां देवतानामष्टकं न्यसेत् ॥

ननु बैन्दवचक्रादुपरि अर्धचन्द्राद्युन्मन्यन्तानां सूक्ष्मा-
वयवानां न्यासः किमिति नोक्त इत्याह

बैन्दवादीनि चक्राणि न्यस्तव्यानि वरानने ।

बैन्दवादीनि चक्राणि चतुरस्रान्तानि नवचक्राणि न्य-
स्तव्यानि स्थूलत्वात् अर्धचन्द्राद्युन्मन्यन्तानि भावनी-
यानीत्यर्थः । अतः स्थूलन्यासप्रसङ्गेन स्थूलानामेव
[illegible] न्यासो विद्यते इति भावः ॥

सर्वज्ञाद्यावरणन्यासमाह.

नेत्रमूले त्वपाङ्गे च कर्णे पूर्वोत्तरे पुनः ।
चूडाधिके च निम्नार्धे शेषार्धे कर्णपृष्ठयोः ॥

कर्णोत्तरं कर्णस्य पश्चाद्भागः, चूडादिके चूडाद्या आ-
दिर्ललाटं तदपि कर्णोत्तरानन्तरं न्यसेदिति संप्रदायः ।
निम्नं शिरः पश्चात् निम्नस्थलमवटुरेव । कोऽर्थः- चूडा-
दिनेत्रमूलापाङ्गकर्णपूर्वपृष्ठेषु सर्वज्ञादीनां दशानामर्धं
विन्यसेत् । अथ तासामेवार्धं अवटुकर्णपृष्ठपूर्वान्यनेत्रा-
पाङ्गमूलेषु विन्यसेदित्यर्थः । ननु सर्वज्ञादीनां नाम
न कथितं कथमत्र ता एव न्यस्तव्या इति कथ्यन्ते ।
उच्यते, पूर्वचक्रे वशिन्याद्या न्यस्तव्याः कथिताः, अन-
न्तरोपरिचक्रे सर्वसिद्ध्याद्या न्यस्तव्याः कथ्यन्ते, अतः
तयोरपि मध्यदेशस्थानेषु पारिशेष्यात् सर्वज्ञाद्या एव
न्यस्तव्या इति गृह्यन्ते ॥

सर्वसिद्ध्याद्यावरणन्यासमाह

सर्वसिद्ध्यादिकं कण्ठे प्रादक्षिण्येन विन्यसेत् ।

स्पष्टम् ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सर्वसंक्षोभिण्याद्यावरणन्यासमाह

हृदये मनुकोणस्थाः शक्तयोऽपि च पूर्ववत् ।

हृदये वक्षसि पूर्ववत् प्रादक्षिण्येन मनुकोणस्थाः चतुर्दशकोणस्थाः सर्वसंक्षोभिण्याद्या न्यस्तव्या इति शेषः ॥

अनङ्गकुसुमाद्यावरणन्यासमाह

नाभौ त्वष्टदलं तच्च वंशे वामे च पार्श्वके ।
उदरे सव्यपार्श्वे च न्यसेदादिचतुष्टयम् ॥
वंशवामान्तरालादि न्यसेदन्यचतुष्टयम् ।

नाभौ नाभिप्रदेशे अष्टदलपद्मं तद्धि वंशे वंशपृष्ठास्थिनि सव्यपार्श्वे दक्षिणे वंशवामान्तरालादि वंशवामास्थिपार्श्वयोरन्तरालं वामपार्श्वपुरोभागयोः अन्तरालं पुरोभागवक्षभागयोरन्तरालं दक्षपार्श्वपृष्ठवंशयोश्च अन्तरालं गृह्यते । अन्यत् चतुष्टयं अनङ्गरेखानङ्गवेगिन्यनङ्गाङ्कुशानङ्गमालिनीनां चतुष्टयं नाभिदेशस्य पश्चिमांदादक्षिणमनङ्गकुसुमादीनां चतुष्टयं वायव्यादिनैर्ऋत्यान्तमनङ्गरेखादीनां चतुष्टयं न्यसेदित्यर्थः ॥

कामाकर्षिण्यावरणन्यासमाह

स्वाधिष्ठाने न्यसेत् स्वस्य पूर्वोद्दक्षावसानकम् ।

स्वाधिष्ठानकमलप्रदेशे स्वस्य पूर्वात् पूर्वादिभागमारभ्य दक्षावसानकं दक्षिणदिगवसानपर्यन्तं चतुर्दिक्षु प्रतिदिशं चतस्रः चतस्रः शक्तयः कामाकर्षिण्याद्याः क्रमेण न्यस्तव्याः ॥

ननु कामाकर्षिण्याद्याः कथमनुमीयन्ते सर्वसंक्षोभिण्यादिमुद्राशक्त्यावरणन्यासमाह

मूलाधारे न्यसेन्मुद्रादशकं साधकोत्तमः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मूलाधारे मूलाधारप्रदेशे । शिष्टं स्पष्टम् ॥

ननु किं मूलाधारे मुद्रादशकं ध्यानेन न्यस्तव्यमित्याशङ्क्याह

पुनः सव्ये च वंशे च वामे चैवान्तरालके ।
ऊर्ध्वाधो दश मुद्राश्च ऊर्ध्वाधोवर्जितं पुनः ॥

पुनःशब्दाब्वामो न्वहृदलं तद्व्यत्याहृदलन्यासोक्तस्थानान्युच्यन्ते । वंशे पृष्ठवंशे सव्ये च पार्श्वे च चकाराद्दुनरयोर्ग्रहणं वामे चैवान्तरालके पृष्ठवंशवामपार्श्वान्तरालके पृष्ठवंशवामपार्श्वान्तराले चकारात् वामपार्श्वाद्यन्तरालानि गृह्यन्ते । कोऽर्थः — पृष्ठवंशादिदिक्षु वायव्याद्यन्तराले चोर्ध्वाधस्ताच्च दश मुद्रा न्यसेत् । ननूर्ध्वाध इति किमन्तरस्थानद्वयं, नेत्याह ऊर्ध्वाधोवर्जितं पुनरिति । अनन्तरोर्ध्वाधः स्थानद्वयमिति

"पूर्वेशानदिशोर्मध्ये स्थानमस्य प्रकीर्तितम् ।
नैर्ऋताम्बुदिशोर्मध्ये स्थानमस्य प्रकीर्तितम् ॥"

इति तत्त्वविमर्शिन्यामनन्तदुक्तरीत्या दशलोकपालार्चनरीत्यैव स्थानद्वयमित्यर्थः ॥

ब्रह्माण्याद्यावरणन्यासमाह

ब्रह्माण्याद्यष्टकं दलजङ्घायां . . . ।

विन्यसेदित्यनुषङ्गः । शिष्टं स्पष्टम् ॥

ननु दलजङ्घायां न्यसेदित्युक्तं तासां कानि स्थानानीत्याह

तास्तु पूर्ववत् ॥

ता ब्रह्माण्याद्याः । पूर्ववत् पुनः सव्ये च वंशे चेत्युक्तस्थानेषु । अत्र पृष्ठवंशशब्देन पश्चाद्भागो लक्ष्यते । जङ्घायाः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पश्चिमादिचतुर्दिक्षु वायव्याद्यन्तरालेषु च ता ब्रह्माण्याद्या न्यस्तव्या इत्यर्थः ॥

अणिमाद्यावरणन्यासमाह

वामजङ्घं समारभ्य वामादिक्रमतोऽपि च ।
सिद्ध्यष्टकं न्यसेत् तेषु द्वयं पादतले न्यसेत् ॥

वामजङ्घां समारभ्य वामजङ्घायाः पश्चिमं भागमारभ्य वामादिक्रमतोऽपि च वामान्तरालादिक्रमेण तेषु पूर्वोक्तस्थानेषु सिद्ध्यष्टकं न्यसेत् इति शिष्टद्वयं पादतले न्यसेदिति ॥

उक्तन्यासोत्कर्षं दर्शयन्नुपसंहृत्य फलभूतां वासनां विधत्ते

कारणात् प्रहृतं न्यासं दीपाद्दीपमिवोदितम् ।
एवं विन्यस्य देवीं तां स्वात्माभेदेन चिन्तयेत् ॥

कारणात् प्रकाशविमर्शसामरस्यरूपात् निखिलनिधानजगद्रूपात् दीपाद्दीपमिव प्रहृतं महाभासं कारणरूपं एवमुक्तप्रकारेणोदितं कथितं न्यासं विन्यस्य स्वात्मनोऽभेदेन चिन्तयेत्, बीचकावयवान् सकलिकान् देहावयवैरपृथक्त्वेन विभाव्य तदधिष्ठात्र्या परया च स्वात्मनोऽपि अभेदं भावयेदित्यर्थः ॥

उक्तैः त्रिभिः षोढादिभिः न्यासैः पराहूपं चिदानन्दलक्षणं भावयन् परिपक्वहृदयो बाह्यपूजाक्रियायोग्यतायै करशुद्धिन्यासं कुर्यादित्याह

ततश्च करशुद्ध्यादिन्यासं कुर्यात् समाहितः ।

ततस्त्रिविधन्यासानन्तरं करशुद्ध्यादिन्यासं

"कारणात्म परामृष्ट कार्यरूपाङ्गुलिस्थिताम् ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

करोमि कृत्स्नचिन्मयीं शुचिं करयोः स्पर्शशोधिनीम् ॥"
इत्यभियुक्तवचनोक्तरीत्या करशुद्धिन्यास आदिर्यस्य न्यासस्य ज्ञातावेकत्वं। समाहितः सावहितः। करशुद्ध्यादिन्यासः चतुःषष्टीप्रकाशोक्तो नात्रोच्यते केवलं नामैव गृह्यते ॥

तत्रानुक्तं विद्यान्यासमाह

मूर्ध्नि गुह्ये च हृदये नेत्रे त्रितय एव च ।
श्रोत्रयोर्युगले देवि मुखे च भुजयोः पुनः ॥
पृष्ठे जानुनि नाभौ च विद्यान्यासं समाचरेत्।

जनुनि जान्वोः विद्याबीजत्रयेण इन्यासो विद्यान्यासः। मूर्ध्नि वाग्भवबीजं, हृदये शक्तिबीजं, गुह्ये कामराजबीजमित्येवं स्थानत्रये बीजत्रयं समाचरेत् न्यसेदित्यर्थः॥

करशुद्ध्यादीनां नामान्याह

करशुद्धिं पुनश्चैव आसनानि षडङ्गकम् ।
श्रीकण्ठादींश्च वाग्देवीः ॥

वाग्देव्यो वशिन्याद्याः। श्रीकण्ठादिन्यासः स्वच्छन्दसंग्रहोक्तः तत्रान्तः प्रसिद्धत्वात् नात्रोक्तः। शिष्टं स्पष्टम् ॥

कामेश्वर्यादिदेवीनां न्यासमाह

आधारे हृदये पुनः ।
शिखायां बैन्दवस्थाने अग्निचक्रादिका न्यसेत्॥

बैन्दवस्थाने शिखायामिति व्यत्ययेन क्रमो ज्ञेयः। बैन्दवस्थानं

"दीपाकारोऽर्धमात्रश्च ललाटे वृत्तमिष्यते।"[1]

इति पूर्वोक्तं ललाटं शिखा नाम कुण्डलिन्या अग्रं शिवस्य विश्रान्तिस्थानेषु। अत्र श्रुतिः

"तस्याः शिखाः शिखामध्ये परमात्मा व्यवस्थितः।"

१ क० पु० वृत्तमिति पाठः।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

इति तद्व्याप्तिस्थानं ब्रह्मरन्ध्रं लक्ष्यते। अग्निचक्रादिकाः अग्निचक्रे कामगिर्याश्रमे मित्रेशनाथात्मके कामेश्वरीदेवीरुद्रात्मशक्तिश्रीपादुकां पूजयामि। सूर्यचक्रे जालन्धरपीठे षष्ठेशनाथात्मके वज्रेश्वरीदेवीविष्ण्वात्मशक्तिश्री०। सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मके भगमालिनीदेवीब्रह्मात्मशक्तिश्री०। ब्रह्मचक्रे उड्डियानपीठे श्रीचक्रनाथात्मके श्रीमहात्रिपुरसुन्दरीदेवीपरब्रह्मात्मशक्तिश्री० इत्येते मन्त्रैः न्यस्तव्याः शक्तयः अग्निसूर्यसोमब्रह्मचक्रादिकाः अग्निचक्रात्मिकाः। कोऽर्थः- आधारहृदयभ्रूमध्यब्रह्मरन्ध्रेषु सूर्यवह्निसोमब्रह्मचक्रेषु कामगिरिजालन्धरउड्डियानपूर्णगिरिपीठेषु रुद्रविष्णुब्रह्मपरब्रह्मचक्रेषु कामेश्वरीवज्रेश्वरीभगमालिनीमहात्रिपुरसुन्दरीर्न्यसेदित्यर्थः। अयमेवार्थः संप्रदायविद्भिः देशिकैः पद्धतिषु प्रपञ्चितः इत्यर्थः॥

तत्त्वन्यासमाह

तत्त्वत्रयं समस्तं च विद्याबीजत्रयान्वितम्।
पादादिनाभिपर्यन्तमागलान्तं शिरस्तथा॥
व्यापकं चेति विन्यस्य ।

तत्त्वत्रयमात्मविद्याशिवाख्यतत्त्वानां त्रयं समस्तं च तत्त्वत्रयं समष्टिरूपं तुरीयतत्त्वं। तदुक्तं स्वच्छन्दसंग्रहे

"धरादिमायान्तमात्मतत्त्वस्यान्तर्गतं स्मृतम्।
शुद्धविद्येश्वरसदाशिवा विद्याख्यतत्त्वगाः॥
शिवाशक्तिद्वयं चैव शिवतत्त्वं प्रकीर्तितम्।
प्रमातृमेयप्रमितिरूपमेतत्त्रयात्मकम्॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

एतत्तत्त्वं शिवतत्त्वं सर्वतत्त्वमयं शुभम् ।"
इति विद्याबीजत्रयान्वितम्, विद्याबीजानि वाग्भवकामराजशक्तिबीजानि एतद्बीजसमुदायरूपं तुरीयबीजं तैः चतुर्भिः बीजैरन्वितं. पादादिनाभिपर्यन्तपदसामर्थ्यात् नाभ्याद्यागलान्तं लभ्यते शिरस इति पञ्चमी सामर्थ्यात् गलादिति लभ्यते । कोऽर्थः : आत्मविद्या,शक्ति,तुरीयतत्त्वानि मूलविद्यावाग्भवकामराजशक्तितुरीयबीजादिकानि चतुर्थीनमोन्तानि उच्चार्य पादादिनाभ्यन्तराद्यादिगलान्तं गलादिशिरोन्तं संस्पृश्य व्यापकं न्यसेदित्यर्थः ॥
भूयोपि परातत्त्वभावनामाह
स्वात्मीकृत्य परं पुनः ॥
परं विश्वोत्तीर्णं तेजः पुनः स्वात्मीकृत्य पूर्वं श्रीचक्रन्यासानन्तरं स्वाभेदेन चिन्तयेदिति परेणैक्यमुक्तम् । इदानीं करशुद्धिः न्यासानन्तरमपि पुनः परतेजोमयवशात् स्वाभिन्नमिव प्रतीयमानं स्वाभेदेन चिन्तयेदिति करशुद्धिः न्याससामर्थ्यात् मायापरमे स्वात्मतया विभाव्येत्यर्थः । स्वात्मीकृत्य पुनः करशुद्ध्यादिन्याससामर्थ्यात् मायोपरागे स्वात्मतया विभाव्येत्यर्थः ॥

अमृतभावनामाह
संतर्पयेत् पुनर्देवीं सौम्याग्नेयामृतद्रवैः ।
सौम्यं ब्रह्मरन्ध्राधोमुखसहस्रारकमलकर्णिकामध्यगतपूर्णसोममण्डलमध्यस्थितत्रिकोणान्तरस्थमनन्ताकानुत्तरात्मकमनन्तरं मूलाधारचतुर्दलकर्णिकामध्यगताग्निमण्डलमध्यस्थत्रिकोणान्तरस्थमनन्ताकानुत्तरात्मरूपपराधिकलारूपम् आग्नेयं द्वयोरप्यस्यन्दानलकुण्डलिनीरू-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पयोः अथ ऊर्ध्वं प्रस्तयोः योनिलिङ्गाकारयोः सामरस्यात् क्षरदमृतद्रवसारैः संतर्पयेदाप्लावयेत्। स्वयमेव संप्रदायविद्भिः देशिकैः षड्विधु पुरा न्यास उच्यते ॥

उक्तचतुर्विधन्यासमनुवादपुरःसरमुपसंहरति

एवं चतुर्विधो न्यासः कर्तव्यो वीरवन्दिते ।
षोढान्यासो(ऽ)णमाद्यैश्च मूले देव्याधिकः प्रिये ॥
करशुद्ध्यादिकश्चैव साधकेन सुसिद्धये ।

एवमुक्तप्रकारेण षोढान्यासादिः सुसिद्धये सुखेन न्याससामर्थ्यात् निराकृतप्रत्यूहतया परमनिःश्रेयसप्राप्तये साधकेन मुमुक्षुणा कर्तव्यः, न तु सिद्धेन तस्य मुक्तत्वात्, न ध्यानं न तपःक्रिया। तदुक्तं विज्ञानभट्टारके

"येरेव पूज्यते द्रव्यैस्तर्प्यते वा परापरः ।
यश्चैव पूजकः सर्वं स एवैकः क्व पूजनम् ॥"

इति ॥

न्यासचतुष्टयस्य कालभेदेन विनियोगमाह

प्रातःकालेऽथवा पूजाकाले वा होमकर्मणि ।
जपकालेऽथवा तेषां विनियोगः पृथक् पृथक् ॥
पूजाकाले समस्तं वा कृत्वा साधकपुङ्गवः ॥

प्रातः षोढान्यासं पूजासमये (ऽ)णमादिन्यासं, होमकाले मूलविद्यान्यासं, जपकाले करशुद्ध्यादिन्यासं कुर्यादिति* अयं पृथक्पृथग्विनियोगः। अथवा पूजाकाले समस्तं चतुर्विधं न्यासं कृत्वा साधकपुङ्गवः साधकश्रेष्ठः चतुर्विधन्यासकरणसामर्थ्यात् विशीर्णपापजालत्वात् प्रत्यासन्नमोक्षत्वात् ॥

अत एव

षट्त्रिंशत्तत्त्वपर्यन्तमासनं परिकल्प्य च ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

गुप्तादियोगिनीनां च मन्त्रेणाथ बलिं ददेत् ।

षट्त्रिंशत्तत्त्वपर्यन्तं क्षित्यादिशिवान्ततत्त्वसमुदायम् आसनं परिकल्प्य, चिन्मरीचीनामाधारत्वात् आसनं श्रीचक्रं परिकल्प्य । तदुक्तं श्रीपराक्रमे

"हृत्सरोजान्तरे ध्यायन् पृथिव्यादिशिवान्तकम् ।
सौवर्णजपकुसुमस्वरूपेण समनतां नयेत् ॥"

इति । गुप्तादियोगिनीनामित्यत्र समस्तप्रकटमध्याहर्तव्यम् । आदिपदेन गुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यातिरहस्यपरापरातिरहस्ययोगिन्यो गृह्यन्ते । बलिं पूजां । तत्र
एदुः/ निघण्टुः बलिः

"बलिः पूजोपहारेऽपि दैत्यभेदे कलौ ध्रुव ।"

इति । महाकविभिरप्युक्तम् "अवचितबलिपुष्पे"त्यादिना । कोऽर्थः — भाविनां बाह्यपूजाकरणात् पूर्वं

"यद्यद्बाह्यं वक्ष्यमाणं तत्तदान्तरमाचरेत् ।"

इत्यस्मदुक्तरीत्यान्तर्यागार्थं स्वशरीरतत्त्वसमुदायरूपं चक्रं विभाव्य "समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यातिरहस्ययोगिनीश्रीचक्रपादुकाभ्यो नमः" इति योगिनीमूलमन्त्रेण स्वशिरसि पूजां कुर्यादित्यर्थः ।
वां/ एतेन बाह्यपूजां सर्वस्यादावन्ते च कुर्यादिति सूच्यते ॥

अन्तरविघ्ननिरासमाह

पिण्डरूपपदग्रन्थिभेदनाद्विघ्नभेदनम् ।
गुह्यहृन्मुखमूर्धसु विद्यान्यासेन सुन्दरि ॥

गुह्यहृन्मुखमूर्धसु चतुर्षु स्थानेषु विद्यान्यासेन सौभाग्यविद्याया बीजचतुष्टयन्यासेन पिण्डं कुण्डलिनी, पिण्डशब्देन कुण्डलिनीस्थानं गुदमेढ्रान्तरं कन्दो लक्ष्यते । रूपपदेति व्यत्ययो ज्ञेयः । पदं हंसः, पदशब्देन हंसस्थानं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हृदयं लक्ष्यते। रूपं बिन्दुः, रूपशब्देन बिन्दुस्थानं ललाटं ल-
क्ष्यते। ग्रन्थिशब्देन यत्र विश्वं सूत्रे मणिरिव ग्रथ्यते तद्विश्व-
मूलं ब्रह्मरन्ध्रं चिन्मयं लक्ष्यते। एतच्चतुष्टयभेदात् विघ्नभेदनं।
कोऽर्थः — गुह्यादिस्थानचतुष्टये विद्याबीजचतुष्टयन्यासेन

"पातालादिषु लोकेषु ये विघ्ना भेदलक्षणाः।"

इत्यभियुक्तवचनोक्तरीत्या पातालादिरूपेण पिण्डपदरू-
परूपातीतस्थानानि कन्दहृदयललाटब्रह्मरन्ध्राणि भे-
दलक्षणानि भित्त्वा, तदूर्ध्वं तदतीतचिन्मयाद्वयानन्दवि-
श्रान्तिर्निर्वाणम् इत्यर्थः। एतेन सर्वमपि बाह्यपूजानन्तरं
कुर्यादित्युपलक्ष्यते॥

अन्तर्यागे देहस्यैव यागगृहत्वात् तदन्तर्विघ्नान् निरस्य
बहिर्यागगतानां विघ्नानामुत्सारणं कुर्यादित्याह

यागमन्दिरगांश्चैव विघ्नानुत्सार्य मन्त्रवित्।

"अपसर्पन्तु ते भूता" इत्यादि "हुमस्त्राय फट्" इति मन्त्र-
वित्साधको निर्गच्छतां विघ्नानां निजवामाङ्गसंकोचना-
न्मार्गं दत्त्वा उत्सार्य।

भूमिगतान् नभोगतान् दिव्यांश्च विघ्नानुत्सारयेदित्याह

पार्ष्णिघातेन भौमांश्च तालेन च नभोगतान्।
अस्त्रमन्त्रेण दृष्ट्या च दिव्यान् विघ्नान् व्यपोहयेत्॥

व्यपोहयेन्निःसारयेत्॥

निर्गच्छतां विघ्नानां पुनरप्रवेशाय वह्निप्राकारभावना-
माह

दिक्ष्वधोर्ध्वं ततो वह्निप्राकारं भावयेदिति॥

"संविदग्नौ महासारे विमर्शैकसमीरिणे।
भेदाभासमिदं सर्वं जुहोम्यपुनरुद्भवम्॥"

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इत्यभियुक्तवचनोक्तरीत्या सर्वतः स्फुरितपरसंविदेव महावह्निः स एव प्राकारो, दुर्लंघ्यत्वात् सर्वतो दिक्षु परिस्फुरद्द्वयपरसंविदात्मकमहावह्निप्राकारपरिकल्पनभावनया भेदप्रतीतिलक्षणानां विघ्नानामप्रवेशः इत्यर्थः ॥

सूर्यपूजामाह

सामान्यार्घ्येण देवेशि मार्तण्डं परिपूजयेत् ।
प्रकाशशक्तिसहितं ॥

सामान्यार्घ्यं विशेषार्घ्यं च वक्ष्यते प्रकाशशक्तिसहितः प्रकाशः परमः शिवः, शक्तिर्विमर्शाख्या तया सहितः "नित्यश्रीसमवेतस्य पूजनमहन्तया मतिः" इत्यस्मदुक्तरीत्या सर्वसामान्यार्घ्येण स्वात्माहंभावनालक्षणया पूजया भावयेदित्यर्थः । बाह्यार्थः स्पष्ट एव ॥

अस्यैव गुणाधिक्यमाह

ग्रहणकल्पमुज्ज्वलम् ।
ग्रहादिपरिवारं च विश्वतेजोवभासकम् ॥

"स्वसंविद्विपुरा देवी लौहित्यं तद्विमर्शनम् ।"
इति प्रामाणिकोक्तवचनरीत्या विमर्शनं विचारणमुज्ज्वलम् उदयास्तमयरहितं, ग्रहादिपरिवारं च विषयान् गृह्णन्तीति ग्रहा इन्द्रियाणि तेषामादि मनः तत्परिवारं च विविधविषयग्रहणलक्षणसंकल्पप्रत्ययप्रवाहप्रवर्तकमित्यर्थः । मन्त्रोपनिषत् "धियो यो नः प्रचोदयात्" इति विश्वतेजोवभासकं "तद्देवान्तरं ज्योतिषां ज्योतिः" इति श्रुत्युक्तरीत्या बाह्यतेजोगुणप्रतीतिकारणनिजस्फुरणम् । बाह्यार्थस्तु सोमादयो ग्रहाः, सूर्यस्य प्रधानत्वात्; आदिशब्देन षडङ्गानि गृह्यन्ते । स्पष्टम् ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

बाह्यचक्रोद्धारमाह ।

सौम्याग्नेययुतैर्देवि रोचनागुरुकुङ्कुमैः ।
मूलमुच्चारयन् सम्यगालिखेच्चक्रराजकम् ॥

सौम्यं कर्पूरं सौम्यनामवाचकत्वात्, आग्नेयं काश्मीरं, कश्मीरजन्माग्निशिखमित्यमरः । रोचना गोरोचना अगुरुः कालागुरुः, कुङ्कुमं घुसृणं, एतैः सुराचर्चनया पङ्कीकृत्य तेन स्वर्णादिमये पट्टे हेमसूच्या विलिख्य मूलं सौभाग्यविद्यामुच्चारयन् परेण च चक्रं लेखयति, स्वयं चोल्लिखति तदोच्चरन् चक्रराजं चतुराम्नायत्वात् तन्त्रवं चक्रे-ध्येऽपि उत्तमं सम्यक् "समत्रिकोणद्वन्द्वयं समरेखं मनोहरम्" इत्यभियुक्तवचनोक्तरीत्या भावयेत् लिखेत् लेखयेच्च । तदुक्तमभियुक्तैः "कस्तूरीघुसृणेन्दुसुराभिश्चक्रराजं लिखेदिति ॥

योगिनीमूलमन्त्रेण क्षिपेत्पुष्पाञ्जलिं ततः ॥

योगिनीनां प्रकटादीनां मूलमन्त्रेण "समस्तप्रकटेत्यादिपूर्वोक्तेन पुष्पाञ्जलिं ततः तत्र श्रीचक्रे निक्षिपेत् ॥

पुष्पाणामभावे

मणिमुक्ताप्रवालैर्वा विलोमं मूलविद्यया ।
अशून्यं सर्वथा कुर्यात् ॥

विलोमं प्रतिलोममुच्चारितया सौभाग्यविद्यया वाशब्दः काकाक्षिवदुभयत्र संयुज्यते । अशून्यमरहितं सर्वथैकेनापि प्रकारेण कुर्यात् । पुष्पाणामभावे मण्यादिभिर्वा योगिनीमूलमन्त्रेण सौभाग्यविद्यया वा सर्वथाऽशून्यं चक्रं पूजयेदित्यर्थः ॥

तथाकरणे निष्फलमाह

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शून्ये विघ्ना अनेकशः ।

मत्स्यादिभिः शून्ये सति श्रीचक्रे अनेकशो विघ्ना बहवो विघ्नाः सपर्यान्तरायाः संभवेयुः ॥

सामान्यार्घ्यविधानमाह

श्रीचक्रस्यात्मनश्चैव मध्ये त्वर्घ्यं प्रतिष्ठिपेत् ।

चक्रस्य पूर्वोक्तरीत्योद्धृत्य तस्य साधकस्य मध्ये अर्घ्यं वक्ष्यमाणरीत्या प्रतिष्ठापयेत् ॥

अर्घ्यप्रतिष्ठापनप्रकारमाह

चतुरस्रान्तरालस्थ कोणषट्के सुरेश्वरि ।
षडासनानि संपूज्य ॥

"आनन्दभैरवायेति वौषडन्तेन तर्पयेदि"त्यन्तेन चतुरस्रान्तरालस्थ कोणषट्के आदौ चतुरस्रं लिखित्वा, तदन्तर्वृत्तं तदन्तः षट्कोणं, तन्मध्ये त्रिकोणमिति। मण्डले गोमयालिप्तभूतले मत्स्यमुद्रया विलिखेदिति सामान्यार्घ्यं लक्ष्यम्। तदुक्तं श्रीपराक्रमे

"ततो गोमयसंलिप्ते चतुरस्रे भुवः स्थले ।
प्रवाहात् पार्श्वहस्तेन कृतया मत्स्यमुद्रया॥
दिव्यगन्धतुल्ययुक्तं विलिखेदर्घ्यमण्डलम् ।
वेदाश्रवृत्तषट्कोणत्रिकोणान्यन्तरेन्तरे ॥"

इति चतुरस्रवृत्तान्तरालस्थे कोणषट्के षडासनानि संपूज्येति अमृतार्णवपोताब्ज आत्मचक्रसर्वमन्त्रसाध्यसिद्धासनानि संपूज्य ॥

त्रिकोणस्यान्तरे पुनः ।
पीठानि चतुरो देवि कामरूपाउ इति क्रमात् ॥
अर्चयित्वा ॥

षट्कोणान्तरस्थत्रिकोणमध्ये कामगिरिपीठं, पूर्णगिरिपीठं, जालन्धरपीठं, उड्डियानपीठं च क्रमात् त्रिचतुरान्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्रीन् वा चतुरो वा त्रिकोणकोणे तु त्रयं मध्ये चैकमर्चयि-
त्वा तत्राधारं प्रतिष्ठाप्य ॥

अर्घ्यपादे तु वह्नेर्दश कला यजेत् ।

अर्घ्यपादे आधारे तत्र पात्रं प्रतिष्ठाप्यास्य अभ्यर्च्याधारं
तन्मध्ये वह्निबिम्बमभ्यर्च्य तत्परितः कलाश्चाभ्यर्च्य
तदुक्तं स्वच्छन्दसंग्रहे

"षट्कोणे तु त्रिकोणे तु वह्निबिम्बं कलायुतम् ।
आवाह्याधारतो देवि पूजयेन्मन्त्रवित्तमः ॥"

इति यामाद्यादिक्षान्तदश वर्णपूर्वं तस्यैव वह्नेः दश कलाः
धूम्रार्चिराद्या यजेत् । तदुक्तं स्वच्छन्दे

"यादिक्षान्तादिवर्णानि कला वह्नेर्महेश्वरि ।
एताः कलाः समभ्यर्च्य स्वस्ववर्णैर्यथाविधि ॥
स्वबीजाद्याश्चतुर्थ्यन्तनाममध्यनमोन्तिमाः ।
प्रोक्ता वह्निकथा सम्यङ्नामानि शृणु सांप्रतम् ॥
धूम्रार्चिर्नीलरक्ता च कपिला विस्फुलिङ्गिनी ।
ज्वालामालिन्यर्चिष्मती तदूर्ध्वं हव्यवाहनी ॥
अष्टमी कव्यवाहा च रौद्री संहारिणी ततः ॥"

इति ॥

तत्र पात्रं प्रतिष्ठाप्य तत्र सूर्यकला यजेत् ।
पात्रे सूर्यकलाश्चैव कभादि द्वादशार्चयेत् ॥

पात्रमभ्यर्च्य तत्र मध्ये सूर्यमभ्यर्च्य । तदुक्तं स्वच्छन्दसंग्रहे

"तत्र प्रक्षालितं पात्रं स्थापयित्वा तथोपरि ।
हृदयात् सूर्यबिम्बं च समावाह्य स्वमन्त्रतः ॥
अर्घ्यं संपूजयेत् ॥"

इति । अथ सूर्यकलाः

"पूजयेत् कादिठान्तं च वर्णजातं क्रमात् क्रमात् ॥"

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

द्वयं द्वयं प्रयोक्तव्यं कलास्व तदनन्तरम् ।"

इत्यस्मदुक्तरीत्या कठादि ककारादि-ठकारान्तवर्णयुग्मयुक्त द्वादशादित्यकलाः क्रमात् तपिन्याद्या द्वादशार्चयेत् । तदुक्तं स्वच्छन्दे

"कादिठान्ताक्षरा देवि मूर्तिनाम्ना समीरिताः ।
तपिनी तापिनी चैव धूम्रा मरीचिर्ज्वालिनी रुचिः ॥
सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा ।
एताः सौरकलाश्चैव व्युत्क्रमाद्वादिभान्तिमाः ।"

तपिनी तापिनी चैव धूम्रा बोधिनी शोषिणी तथा ॥
भ्रमिणी क्लेदिनी चैव वरेण्या कर्षिणी तथा ।
सुषुम्ना पुष्टिवाहा च ज्येष्ठा चैव हिरण्यदा ॥
एताः सौरकलाश्चैव व्युत्क्रमाद्वादिभान्तिमाः ।"

इति । कठादिकथनात् यकारादयो वह्निकला दश, अकारादयः षोडश कलाः सोमकला गम्यते । तत्र पात्रे लवङ्गादिभिः सुगन्धिकुसुमैर्वासितं सलिलमापूर्य तस्मिन् इन्दुमण्डलमभ्यर्च्य । तदुक्तं स्वच्छन्दे

"एला लवङ्ग कक्कोला जातीफलसुसंयुतात् ।
सुगन्धिकुसुमैर्दिव्यैः सहितः सजलं किरेत् ॥"

इति ।

"नवयोनिं समालिख्य पूर्वं जलमध्यतः ।
विशुद्धितः समावाह्य चतुरस्रे समर्चयेत् ॥"

इति च ॥

विधृते तु पुनर्द्रव्ये षोडशेन्दुकला यजेत् ।

तस्मिन् विधृते तु द्रव्ये अर्घ्यविशेषात्मकं अर्घ्यं च द्रव्यमयत्वमेव हि विशेषार्घ्यस्य । तदुक्तं स्वच्छन्दे

"अतो हि विशेषार्घ्यस्य साधनं प्रोच्यतेऽधुना ।
आधारपात्रयोश्चैव तयोर्वह्न्यर्कपूजनम् ॥
सामान्यार्घ्योक्तमात्रेण कृतपूजितपूज्यके ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पात्रे वा सर्वमापूर्य शिरो मन्त्रेण पूर्ववत् ।"

इति । षोडशेन्दुकलाः क्रमात् अकारादिषोडशस्वरादिका अमृताद्याः षोडशेन्दुकलाः न्यसेत् । तदुक्तं स्वच्छन्दे

"आदिक्षान्ताद्यन्तगाः सौम्याः कलाः षोडश कीर्तिताः ।
तासां नामानि वक्ष्यामि शृणु सर्वाङ्गसुन्दरि ।
अमृता मानदा पुष्टिस्तुष्टिः प्रीतिर्महेश्वरि ॥
रेवती ह्रीमती देवि श्रीः कान्तिश्च स्वधा ततः ।
ज्योत्स्ना हैमवती चैव छाया संपूरिणी तथा ॥
वामा नाम कलानां च नामान्येतानि वल्लभे ।"

इति ॥

"अमृतेशीं च तन्मध्ये भावयेच्च नवात्मना ॥"

"अमृतेशीं समुद्धृत्य भृगुः संवर्तकस्तथा ।
पिनाकिनं च खड्गेशं भुजङ्गं ज्वालिनं तथा ॥
योजयित्वा क्रमेणैव कार्यं कारणमस्तकम् ।
अर्धेन्दुं च यजेदन्ते नवात्माद्यं समुद्धृतः ॥"

इति स्वच्छन्दसंग्रहोद्धृतं नवात्मानं तन्मध्ये तेन मन्त्रेणामृतेशीं

"अमृतामृतरश्म्योघसंतर्पितचराचराम् ।
भवानि भवशान्त्यै त्वां भावयाम्यमृतेश्वरीम् ॥"

इत्यभियुक्तोक्त्यामृतस्राविणीं भावयेत्

"नवात्मना ततो मात तर्पयेद्धातुदेवताः ।"

इति धातुदेवता डाकिन्याद्याः । अन्यत्रोक्तम्

"विशुद्धौ हृदये नाभौ स्वाधिष्ठाने च मूलके ।
आज्ञायां धातुनाथाश्च न्यस्तव्या डादिदेवताः ॥"

इति नवात्मना पूर्वोक्तेन 'आनन्दभैरवायेति वौषडन्तेन तर्पयेत् ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

आनन्दभैरवं चैव वौषडन्तेन तर्पयेत् ।

आनन्दभैरवं चैवेत्येवकारो नवात्मनैवानन्दभैरवं तर्पयेत् नवात्मानमुच्चार्य आनन्दभैरवाय वौषडिति तर्पयेदित्यर्थः ॥

सामान्यार्घ्यप्रकारं विशेषार्घ्येऽतिदिशति

तथैवार्घ्यं विशेषेण साधयेत् साधकोत्तमः ।

सामान्यार्घ्यप्रकारमेव विशेषार्घ्यस्य साधनमिति स्पष्टम् ॥

एवमर्घ्यशुद्धिं कृत्वानन्तरं

गुरुपादाञ्जलिमापूर्य भैरवाय ददेत्पुनः ।

गुरूणां परमशिवादिस्वगुरुपर्यन्तानां पादाञ्जलीं परम्परां दिव्यसिद्धमानवौघत्रयवतीमापूर्य स्वशिरसि अर्घ्योदकाक्तकुसुमैरभ्यर्च्य शोधितमर्घ्यमाललाटं समुद्धृत्य, महापद्मवनान्तःस्थशृङ्गाटोदरवासिने गुरुरूपिणे पूर्वोक्तनिर्वचनाय ददेन्निवेदयेत् ॥ तत्पुनः ।

तदाज्ञाप्रेरितं तत्स्वगुरुपङ्क्तौ निवेदयेत् ।

तस्य गुरुरूपिणो भैरवस्याज्ञया प्रेरितमनुज्ञातं तच्च द्रव्यं स्वगुरुपङ्क्तौ निवेदयेत् ॥

प्रसादग्रहणमाह

तदीयं शेषमादाय कामाग्नौ विश्वतत्त्वपि ।

पादुकां मूलविद्यां च जपं होमं समाचरेत् ॥

तदीयं शेषं गुरुदेवतायाः प्रतिशेषं द्रव्यमादाय तत्त्वचतुष्टयशोधनमन्त्रैः "कामो देवः स काम्यत्वादि"त्यस्मदुक्तरीत्या विश्वघस्मरकलापतौ कामेश्वराख्ये सर्वप्राणिस्वात्मन्यग्नौ विश्वतत्त्वपि

"विश्वग्रसनशीलं तद्रूपं तेजोमयं ततः ।"

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इत्यात्मावतारोक्तरीत्या विश्वघस्मरकलाजाले पादुकां स्वगुरुपादुकां सौभाग्यमूलविद्यां जपं होमं समभेदन्यनलेपणलक्षणं च समाचरेत् । तदुक्तं श्रीपराक्रमे

"निवेद्यात्मस्तकं स्वीयगुरोरर्घ्यं तदात्मना ।
कल्पान्तहुतभुक्कल्पचिदग्नौ विश्वघस्मरे ॥
ज्ञेयराशिमयं हव्यं वासनात्मोपदंष्ट्रकम् ।
एतेषां तर्पणो जुहृञ्जपेदात्मानमात्मना ॥"

इति ॥

ननु कः कामाग्निः स तु कुत्र निवसति किं वा हविरित्यत आह

महाप्रकाशे विश्वस्य संहारवमनोद्यते ।
मरीचिवृत्तीर्जुहुयान्मनसा कुण्डलीमुखे ॥ 91

व्यवस्थित इति शेषः । अत्र श्रुतिः

"तस्याः शिखाया मध्ये तु परमात्मा व्यवस्थितः ।"

इति । महाप्रकाशे निरिन्धनदीप्ते निर्वाणदीप्ते प्रमातरि वह्नौ विश्वस्य संहारवमनोद्यते विश्वस्य शिवादेर्भूम्यन्तस्य संहारे निजकारणतावन्मात्रावस्थितौ, वमने सर्जने चोद्यते शिवस्यैवेच्छया

"स्वेच्छयैव जगत् सर्वं निगरत्युद्गिरत्यपि ।

इति । मनसा सार्धं मरीचिवृत्तीर्जुहुयात् आन्तरस्य चिदनलस्य मरीचयोऽक्षनिवहा अर्थेषु तेषां संवादिका वृत्तयः । तदुक्तं विज्ञानभैरवे

"तत्र तत्राक्षमार्गेण चैतन्यं व्यज्यते विभोः ।"

इति । कोऽर्थः कुण्डलिन्याः शिखायां महाशून्ये व्यवस्थिते सर्वप्राणिग्राह्यात्मप्रकाशलक्षणे कामाग्नौ "आत्मा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मनसा संयुज्यते" इत्यादिनश्रान्तरोक्तरीत्या वह्निः अर्थेषु प्रहृतचित्करीचिद्रूपान्त वृत्तिलक्षणं हविः तेनैव मार्गेण अन्तर्मुखतया मनसा जुहुयादित्यर्थः।

तदुक्तं विज्ञानभैरवभट्टारके

"महाशून्यालये वह्नौ भूताक्षविषयादिकम्।
हूयते मनसा सार्धं स होमश्चेतनास्रुचा॥"

इति। महामहिमपाली चायमेवान्तरो होमः। तदुक्तं पद्धतिषु

"धर्माधर्मेन्धनैर्दीप्ते आत्माग्नौ मनसा स्रुचा।
सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम्॥"

इति॥

आन्तरामेव पूर्णाहुतिमाह

अहन्तेदन्तयोरैक्यमुन्मनीस्रुचि कल्पितम्।
मध्यनोड्केकसंभूतं वस्तुरूपं महाहविः।
हुत्वा हुत्वा स्वयं चैव सहजानन्दविग्रहः॥

"नोदनेस्तर्पणैः सम्यग्विशुद्धैरमृतात्मभिः।
समाहन्त्वा करोमीदं विश्वं हव्यवपुर्वरम्॥"

इत्यभियुक्तवचनोक्तरीत्या अहन्ताप्रमाता इदन्ताप्रमेयं तयोरैक्यं प्रमाणं तत्त्वयसामरस्यरूपं

"विश्वचित्प्रवरप्रमेयसुभगा ब्राह्मी महाभूमवे-
विश्वोत्तीर्णमहाप्रमातृवपुषः शक्तिं तु नैसर्गिकीम्।
प्रामाण्यप्रणयेन शक्तिखचितामध्युष्टच तुर्दिर्शनी?
संवित्त्यर्कसमिद्धवस्तुभरतो मध्नामि मन्त्रारणिम्॥"

इत्यभियुक्तवचनोक्तरीत्या मन्त्रारणिमध्यनोड्केकसंभूतं तत्त्वितयसंमष्टिरूपं वस्तुरूपं वस्तुमयं। तदुक्तं मुख्याम्नायक्रमे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

"स्वीकुर्यात्सततं वस्तु यदानन्दसुखं भवेत्।"

इति। महाहविः यस्मिन् हुते स्वे प्रमेयलक्षणे हविषि प्रमातृलक्षणं ज्योतिः निरन्तरं ज्वलति तन्महाहविः, पूर्णाहुतिहोमे उन्मन्यां स्रुचि कल्पितं उन्मनीनाम पूर्वोक्तलक्षणा सा स्रुगित्युच्यते तस्यां स्रुचि तन्मयेनामृतेन पूर्णाहुतिं जुहुयात्। एवंरूपं हविर्हुत्वा

"आनन्दं ब्रह्मणो रूपं तच्च देहे प्रतिष्ठितम्।
तस्याभिव्यञ्जकं मद्यं योगिभिस्तेन पीयते॥"

इति प्रमाणवचनोक्तरीत्या यावदानन्दादिलयो भवति तावदिति वीप्सार्थः स्वयं चैव सहजानन्दविग्रहः। तदुक्तं विज्ञानभैरवे

"जग्धिपानकृतोल्लासरसानन्दविजृम्भणात्।
भावयेद्भरितावस्थां महानन्दस्ततो भवेत्॥"

इति मद्याद्यनुभावेन कृत्रिमानन्दजृम्भणात् महानन्दानुसंधानात्तन्मयो भवेदिति। कोऽर्थः— मन्त्रारणिमथनसंभू-
हन्ता तमिदन्ताहामरस्यमयवस्तुरूपं घृतपूर्णाहुतिं बहुशो हुत्वा परिस्फुरत्परमानन्दो भवेदिति। इयमेवान्तरपूर्णाहुतिः। अत एव

"प्रविष्ट उद्यं श्रीचुल्लि? भेदनिर्हरणात्मिका।
स्थैर्यं मनश्चमत्कारं विना विषयसंगमात्॥" ?

इति क्रमोदयोक्तरीत्या मनःस्थैर्यं जायते॥

बाह्यचक्रार्चनं कुर्यादित्याह

स्वप्रथाप्रसराकारं श्रीचक्रं पूजयेत् सुधीः॥

सुधीः सीधुपानेन नात्यन्तविषयासक्तः स्वसंविन्मात्रस्थितमना। मनसि स्थिते सति धीरपि स्थिता, तस्यां स्थितायां "तत्र प्रत्ययैकतानता ध्यानमिति" योगपातञ्जलशा-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

श्लोक्तरीत्या प्रत्ययैकतानतालक्षणं ध्यानं संभवति। संभा-
वनातिशयाय ध्यानपूजा विष्कृता भवति। अथादौ अमृतीकृ-
त्य हृद्यं क्षीरादिभक्तं पुरस्थस्य निवेद्य स्वात्माग्नौ हुत्वा
प्रज्वलत्परमानन्दसुस्थिरधीर्भूयादित्यर्थः। स्वप्रथाप्र-
सराकारं स्वप्रथां स्वसंवित् तस्या बहिरर्थेषु इन्द्रियद्वारा
प्रसरो व्यापारः तदात्मनः स्फुरणं तत्तदाकारं श्रीच-
क्रं पूजयेत् नान्यत् किंचिदपि संविद्देवतायाः प्रसररूपा-
न्तःकरणचतुष्टयाव्यक्तमहदहंकृतितन्मात्रदशेन्द्रिय-
तद्विषयतत्त्वषट्कषोडशविकारधातुप्रपञ्च एव श्रीचक्रा-
त्मना स्फुरतीति ॥

एतच्छ्रीचक्रपूजामाह "गणेशमित्यादि "चक्रपूजां विधायेत्य-"
मित्यन्तेन

गणेशं दूतरीं चैव क्षेत्रेशं दूतिकां तथा।

श्रीचक्रद्वारशाखयोः गणेशं तच्छक्तिं दूतरीं क्षेत्रेशं
वटुकाख्यं तच्छक्तिं दूतिकां च यजेत्। तदुक्तं संकेतपद्धत्याम्

"द्वैताद्वैतमहामोहशर्वरीक्षपणक्षमः।
भास्वानिव जयत्येको गणेशो दूतरीयुतः॥
प्रतिभायाः परोल्लासो निशाकर इवापरः।
दूतियुक्तः स जयति वटुकस्ताण्डवान्वितः॥"

इति॥

बाह्यद्वारे यजेद्देवि देवीश्च स्वस्तिकादिकाः।

श्रीचक्रबाह्यद्वारप्रदेशे स्वस्तिकाद्या देव्यः सरस्वती-
श्रीदुर्गाभद्रकाल्यः चतस्रः स्वस्तिकादिर्यासामिति स-
मासः। स्वाहाशुभङ्करीगौरीवागीश्वर्यश्च पञ्चैताः ताश्च
दश देवीनायिका यजेत्। तत्प्रसिद्धं पद्धतिषु ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ततश्चान्तस्त्रिकोणेऽपि गुरुपङ्क्तिं त्रिधा स्थिताम्।

ततस्तस्य श्रीचक्रस्यान्तः त्रिकोणे त्रिधा स्थिता दिव्यसिद्धमानवौघत्रयवर्ती गुरुपङ्क्तिः शिवादिस्वगुरुपर्यन्तानां गुरूणां पङ्क्तिः परम्परा तामपि शास्त्रात् यजेदित्यनुषङ्गः। गुरुपरम्परा गुरुमुखादेव ज्ञातव्या, न लोकतो नच पुस्तके-लिखिता तन्त्ररहस्यत्वात् ॥

तदन्तश्च महादेवीं तामावाह्य यजेत्पुनः।
महापद्मवनान्तःस्थां कारणानन्दविग्रहाम्॥
मदङ्कोपाश्रयां देवीमिच्छाकामफलप्रदाम्।

तदन्तः श्रीचक्रमध्यत्रिकोणमध्यबिन्द्वाख्ये चक्रे तां महापद्मवनान्तःस्थां

“महापद्मवनान्तःस्थे वाग्भवे गुरुपादुकाम्।”

इत्यत्रोपपादितरूपकुलाधोमुखसहस्रदलकमलमहापद्मवनमध्यस्थां, मदङ्कोपाश्रयां मत्ताश्रितेश्वरस्य प्रकाशात्मनो ममाङ्कस्थां, कारणानन्दविग्रहां कारणं हेतुद्रव्यं। अत्रैव वक्ष्यति

“क्षेत्राणां पतये मह्यं बलिं कुर्वीत हेतुना।”

इति। द्रव्यपानेन य आनन्दः स एव विग्रह आकारो यस्यास्तां। कोऽर्थः — शोधिताहुतीभूतद्रव्यपानपरिस्फुरत्परमानन्दशरीरामित्यर्थः। भवतीमनाश्रितां देवीं विमर्शात्मिकामिच्छाकामफलप्रदाम् इच्छया यत्काम्यते फलं स्वसेवकेन तस्य दात्रीम्

“महापद्मवनान्तःस्थे कारणानन्दविग्रहे।
सर्वभूतहिते मातरेह्येहि परमेश्वरि॥”

इति मन्त्रेणावाह्य यजेत्। ननु महापद्मवनान्तःस्थामित्यनेनैव अनाश्रितो देवोऽनाश्रिता देवी तत्र चक्रे समा-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

बाह्य कामेश्वरकामेश्वरीरूपेण पूज्याविति कथमवसीय-
ते इति चेत् उच्यते, महापद्मवनान्तःस्थाः सकलागम-
शास्त्राणां वक्ता देवोऽनाश्रित एव तस्य शक्तिरनाश्रिता।
नचान्यथा महापद्मवनान्तःस्थां मदङ्कोपाश्रयां भवती-
मिति वचनं न घटते, तथा शिवादीनां तु यद्यप्यागम-
शास्त्रवक्तृत्वमस्ति तथापि महापद्मवनान्तःस्थत्वं ना-
स्ति। तदुक्तं स्वच्छन्दसंग्रहे

"अनाश्रितस्य मध्यस्थं व्योमपद्मं हि विस्तरम्।
असंख्येययोजनं तेजस्तत्त्वसिंहासनस्थितम्॥
अनाश्रितस्येश्वरस्य मध्यस्थः परमेश्वरः।
सूर्यकोट्यर्बुदप्रख्यः शुभ्राङ्गः कनकोज्ज्वलः॥
पञ्चवक्त्रो दशभुजस्त्रिपञ्चनयनः प्रभुः।
सर्वावयवसंपूर्णो बृहन्मूर्तिः सनातनः॥
सर्वज्ञः सर्वकर्ता च सर्वानुग्रहणे रतः।
सर्वरत्नसमाकीर्णः सर्वाभरणभूषितः॥
अनाश्रितकला देवी तस्योत्सङ्गे सदा स्थिता।
पञ्चवक्त्रा त्रिनेत्रा च दशबाहुर्न्दुशेखरा॥
व्यापिण्यादिचतुष्कं च तादृशं परिकीर्तितम्।
पूर्वाद्युत्तरपर्यन्तं दिग्गताः सर्वगाः शिवे॥
रुद्रकोट्यर्बुधानीकैः स्वस्वरूपस्वशक्तिभिः।
संसेविता लोकपालैः सृष्ट्यादीनि करोति सा॥
अनाश्रितोऽयं भगवान् पञ्चवक्त्रस्त्रिदृक् तथा।
दशबाहुश्चतुर्बाहुर्द्विबाहुश्चैकबाहुकः॥
कोल्लागमादिवक्तासीदेवमेव सदाशिवः।
परापरविभागेन प्रोवाचासंख्यमागमम्॥"

उत्तरपदेष्युक्तम्।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

"व्योमाम्बुजसहस्रारे सितकेसरसंकुले ।
तत्रासीनं महादेवमपृच्छत् कुलनायिका ॥"

इति ॥

भवती त्वन्मयैरेव नैवेद्यादिभिरर्चयेत् ।

भवतीमित्यत्रान्वयेति ॥ भवती स्वसंविल्लक्षणां त्वन्मयैरेव

"पञ्चभूतमयं विश्वं तन्मयी त्वं सदानघे ।
त्वन्मयी मूलविद्या च तथा च कथयामि ते ॥"

इति पूर्वोक्तरीत्या पञ्चभूतानि भवदिच्छाविजृम्भितानि

"पञ्चरूपिणमात्मानं देव्याः पञ्चोपचारकैः ।
अर्चयेत्सह गन्धेन पृथिवीकुसुमेन खम् ॥
धूपेन वायुं दीपेन तेजोऽन्येन रसं पुनः ।"

इति प्रामाणिकवचनोक्तरीत्या तत्रैव नैवेद्यादिभिरर्चयेत् । नैवेद्यादयो गन्धपुष्पधूपदीपाः । कोऽर्थः - सुगन्धवत्पदार्थानुभवेन प्रत्यङ्मुखतया प्रमातरि विश्रान्तिर्गन्धसमर्पणं । तच्चात्मप्राप्त्यानुभवेन प्रत्यङ्मुखतया प्रमातरि विश्रान्तिः पुष्पसमर्पणं । स्पर्शवत्पदार्थानुभवेन प्रमातरि विश्रान्तिर्धूपसमर्पणं । सुरूपवत्पदार्थानुभवेन प्रमातरि विश्रान्तिर्दीपसमर्पणं । स्वादुपदंष्ट्रावत्पदार्थानुभवेन प्रत्यङ्मुखतया प्रमातरि विश्रान्तिर्नैवेद्यसमर्पणमित्यर्थः । तदुक्तं मुख्याम्नायरहस्ये

"इन्द्रियद्वारसंग्राह्यैर्गन्धाद्यैरात्मदेवताम् ।
स्वभावेन समाराध्य ध्यातुः सोऽयं महामखः ॥"

इति । बहिरपि गन्धपुष्पधूपदीपनैवेद्यानि पृथिवीवाय्वाकाशतेजःसलिलभावनया देव्यै समर्पयेदित्युपनिषत् ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तत्र

त्रिकोणे त्वन्त्यकोणाया: प्रतिबिम्बाकृती: पुन:।
तत्तत्तिथिमयी नित्या: काम्यकर्मानुरूपिणी:॥

त्रिकोणे श्रीचक्रस्य त्रिकोणे रेखात्रये त्वन्त्यकोणाया: प्रतिबिम्बाकृती: "पुन: पञ्चदशप्रोक्ता भूतानां तन्मयी स्थिता" इत्यत्रैव पूर्वोक्तरीत्या भूतपुण्यात्मिकाया: पञ्चदशाक्षरमालिनीश्रीविद्याया: तत्र स्फुरणात् पञ्चदशप्रतिबिम्बरूपा: तत्तत्तिथिमयी: तत्तत्संख्याप्रतिपादिततिथ्यात्मिका: काम्यकर्मानुरूपिणी:

"नवचक्रमयो योऽसौ महावश्यादिसिद्धिद:।"
इति संकेतपद्धत्युक्तरीत्या बाह्यचक्रार्चनं काम्यकर्मतदनुरूपकरचरणादिमद्रूपधारिण्य: उत्पत्तिविनाशरहितत्वात् नित्या:

"तत: कामेश्वरी नित्या नित्या च भगमालिनी।
नित्यक्लिन्नापि च तथा भेरुण्डा वह्निवासिनी॥
महाविद्येश्वरी दूती त्वरिता कुलसुन्दरी।
नित्या नीलपताका च विजया सर्वमङ्गला॥
ज्वालामालिनी चित्रा चेत्येवं नित्यास्तु षोडश।"

इति चतु:शतीशास्त्रोक्ता: पुन:शब्दादर्चयेदित्यनुषङ्ग:॥

तत्र प्रकटयोगिन्यश्चक्रे त्रैलोक्यमोहने ।

तत्र श्रीचक्रे सत्रैलोक्यमोहने चक्रे पूर्वोक्तनिर्वचने चतुरस्रत्रयलक्षणे प्रकटयोगिन्यो यष्टव्या:, उत्तरस्थितेनान्वय:॥

प्रकटशब्दनिर्वचनमाह

मातृकास्थूलरूपत्वात् लमादिव्यापकत्वत:।
योगिन्य: प्रकटा ज्ञेया: स्थूलविश्वप्रधात्मनि॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मातृकायाः परापश्यन्तीमध्यमावैखर्यन्तायाः स्थूलम-
कारादिक्षकारान्तं पञ्चाशद्वर्णमयं वैखरीरूपं। तदुक्तं स्वच्छन्दे
"स्थूलं पञ्चाशदक्षरम्" इति तद्रूपत्वात् मातृकास्थूलरूप-
वैखरीवर्णात्मकमयत्वात् सिद्धीनां ब्राह्म्यादीनां च। तदु-
क्तं चतुःशतीशास्त्रे

"वर्णानुक्रमयोगेन यस्यां मात्राष्टकं स्थितम्।
वन्दे तामष्टवर्गोत्थमहासिद्ध्यष्टकेश्वरीम्॥"

इति। त्वगादिव्यापकत्वतः, त्वगसृङ्मांसमेदास्थिमज्जा-
शुक्रौजांसि: आदिना गृह्यन्ते, तद्व्यापकत्वात् त्वगाधा-
रभूमध्यरक्तनितम्बस्तनमांस नाभिमेदोवायु हृदयास्थिक-
ण्ठमज्जाशुक्र नासापुट ऊर्ध्वललाटचक्रेषु स्थितत्वात् ब्रा-
ह्म्यादीनां स्थूलविश्वप्रधात्मनि स्थूलत्वकथनात् यत
९१ एवं विश्वं प्रकर्षेण धत्ते इति विश्वप्रधा विश्वंभरा तदात्म-
नि भूगृहतया त्रैलोक्यमोहने चक्रे स्थितत्वात्, मातृका-
स्थूलरूपत्वात् त्वगादिधातूनां स्थूलशरीरावयवतया
९१ ~~त्रैलोक्यमोह~~ तद्व्यापकत्वात् त्रैलोक्यमोहनचक्रस्य
स्थूलविश्वम्भरात्मकत्वात् तदन्तर्गताः सिद्धयो ब्राह्म्या-
द्याश्च प्रकटा ज्ञेयाः॥

अन्त्यभूगृहवासिनीनां नामग्रहणपूर्वकं ध्यानमाह

अणिमाद्या महादेवि सिद्धयोऽष्टौ व्यवस्थिताः।
तास्तु रक्ततरा वर्णैर्वराभयकरास्तथा॥
धृतचिन्तामहारत्ना मनीषितफलप्रदाः।

"अणिमा पश्चिमद्वारे" इत्यादिचतुःशतीशास्त्रोक्ता लघि-
मामहिमेशिता वशित्व प्राकाम्य भुक्तीच्छा प्राप्तिसर्वकामा-
ख्याः सिद्धयः। तथादिशब्देन ब्राह्म्याश्च गृह्यन्तेऽष्टौ व्य

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

वस्थिताः शक्तो सिद्धये निर्घण्टुरसिद्धाः । अत्र तु दशेति तात्पर्यम् ।

"वामजङ्घां समारभ्य वामादिक्रमतोऽपि च ।
सिद्धाष्टकं न्यसेत्तेषु हृदये पादतले न्यसेत् ॥"

इत्यत्रोक्तत्वात् महारत्नं चिन्तामणिः शिष्टं स्पष्टम् ॥

ब्राह्म्याद्या अपि तत्रैव पूज्याः क्रमशः प्रिये ।

ब्राह्म्याद्याः "ब्रह्माणी पश्चिमद्वारे" इति चतुःशतीशास्त्रोक्तास्तत्रैव मध्यमचतुरस्रे पूज्याः क्रमशः ॥
क्रमेण तासां ध्यानमाह

ब्रह्माणी पीतवर्णा च चतुर्भिः शोभिता मुखैः ।
वरदाभयहस्ता च कुण्डिकाक्षसूत्रका ॥
माहेश्वरी श्वेतवर्णा त्रिनेत्रा शूलधारिणी ।
कपालमेणं परशुं दधाना पाणिभिः प्रिये ॥
ऐन्द्री तु श्यामवर्णा च वज्रोत्पलसत्करा ।
कौमारी पीतवर्णा च ~~शङ्खचक्रगदाङ्कान्~~ ॥
~~हस्तपद्मैश्च~~ शक्तितोमरधारिणी ।
वरदाभयहस्ता च ध्यातव्या च सुरेश्वरि ॥
वैष्णवी श्यामवर्णा च शङ्खचक्रगदाब्जकान् ।
हस्तपद्मैश्च बिभ्राणा भूषिता दिव्यभूषणैः ॥
वाराही श्यामलच्छाया पोत्रिवक्त्रसमुज्ज्वला ।
हलं च मुसलं खड्गं खेटकं दधती भुजैः ॥

इति करैरिति शेषः । शिष्टं स्पष्टम् ॥

चामुण्डा कृष्णवर्णा च शूलं डमरुकं तथा ।
खड्गं वेतालकं चैव दधाना दक्षिणे भुजे ॥
नागखेटकघण्टाढ्यं दधानान्यैः कपालकम् ।

वेतालः पिशाचविशेषः । शूलडमरुखड्गवेतालान्

---

१ क० पु० निर्घण्ठे इति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दक्षिणैः करैः नागखेटकघण्टाख्यकपालानि वामक-
रैर्दधानेत्यर्थः ॥

महालक्ष्मीः सुपीताभा पद्मं दर्पणमेव च ।
मातुलिङ्ग[1]फलं चैव दधाना परमेश्वरी ॥

सप्तमम् ॥

ननु मुद्रादशकं किमित्यन्तः चतुरस्रे पूज्यत्वेन ९/
नात्रोक्तं सत्यं, चतुःशतीग्रन्थेऽपि अनुक्तत्वादत्रैव
प्राधान्येन नाख्याताः किंतु श्रीचक्रन्यासे
"मूलाधारे न्यसेन्मुद्रादशकं साधकोत्तमः।"
इति सूचिताः। अतोऽन्तश्चतुरस्रे मुद्रादशकमपि पूजयेत् इति ॥

एवं ध्यात्वा यजेदेताश्चक्रेशीं त्रिपुरां ततः ।

एवमुक्तप्रकारेण एताः प्रकटयोगिनीर्ध्यात्वा चक्रे-
शीं त्रैलोक्यमोहनचक्रेशीं त्रिपुरां यजेत् ॥

विद्यादेवतयोरभेदविवक्षया च त्रैलोक्यमोहनचक्रे-
शी विद्यानिर्वचनमाह

कर्मेन्द्रियाणां वैमल्यात्करशुद्धिकरी स्मृता ॥

"आत्मतत्त्वगतयोरशुद्धयोरत्र कर्मकरणात्मनोर्द्वयोः।
शुद्धतत्त्वलयभावनामयी शुद्धिरात्मकरयोः परा मता ॥"

इत्यस्मदुक्तरीत्या आत्मतत्त्वस्य अशुद्धत्वात् कर्मेन्द्रिया-
णामात्मतत्त्वान्तःपातित्वात् करयोश्च कर्मेन्द्रियत्वात्
अशुद्धयोः करयोः कार्ययोः स्वकारणे शिवतत्त्वे शु ३/
शिवाद्वैतलयभावना करशुद्धिः, तत्करीयं स्मृता निरुक्ता ॥

करशुद्धिभवा शुद्धिरणिमा चात्र संस्थिता ॥

"कारणात्मपरामृष्टकार्यरूपाङ्गुलिस्थिताम् ।
करोमि चिन्मयीं शुद्धिं करयोः स्पर्शशोधिनीम् ॥"

---

१ क० पु० मातुलुङ्गेति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इत्यभियुक्तवचनोक्तरीत्या कार्यस्य शुद्धिर्नाम कारणतावन्मात्रतया पर्यवसानम्। अथवा "अणोरणीयान्" इति श्रुत्युक्ते अणीयसि कारणे विद्यमानस्यात्मनोऽणिमा सिद्ध्यतीति सिद्धिः। सा चात्र त्रैलोक्यमोहने चक्रे स्थितेति तात्पर्यम्॥

द्वितीयचक्रे सर्वासनां पूजामाह

षोडशस्पन्दसंदोहचमत्कृतिमयीः कलाः।
प्राणादिषोडशानां तु प्राणानां प्राणनात्मिकाः॥
बीजभूतस्वरात्मत्वात् कलना बीजरूपकाः।
अन्तरङ्गतया गुप्तयोगिन्यः संस्थिता मताः॥
कामाकर्षणरूपाद्याः स्मृतिप्राधान्यतः प्रिये।
सर्वाशापूरणाख्ये तु चक्रे वामेन पूजयेत्॥

स्पन्दो नाम पराख्यात्मत्वरूपेण प्रसारः। तदुक्तं परापञ्चाशिकायाम्

"सिसृक्षोः प्रथमः स्पन्दः शिवतत्त्वं तदुच्यते।
प्रभा स्मृतं ॥"

इति तेन षोडश स्पन्दाः षोडश विकाराः भूतेन्द्रियमनांसि तेषां संदोहः समूहश्चमत्कारो नाम तस्मिन् चिदतिशयोदयः। तदुक्तं क्रमोदये

"स्थैर्यमेव चमत्कारो विना विषयसंगतिम्।"

इति। तन्मध्ये भूतेन्द्रियमनःसु चिदनुप्रविष्टाः कलाः षोडशधा स्फुरन्ति तदात्मिका इत्यर्थः। कलाः षोडश कलासंख्याः कलाभिधानश्च प्राणः आदिर्येषां प्राणापानव्यानोदानसमान नाग कूर्म कृकर देवदत्त धनञ्जय दश वायवः तेषु षडान्तमान्तरेषु सृष्याः तेषां प्राणनात्मिकाः, प्राणादयो हि एते तु ये तेषां प्राणादी-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नामपि प्राणात्मिका इत्यर्थः । बीजभूतानि बिन्दुयुक्तत्वात् स्वराः षोडशाकारादिविसर्गान्ताः तदात्मकत्वात् कलनात् अकमात्मबिन्दुकस्वरप्राप्तत्वात्, कलनाबीजरूपकाः स्वस्वबीजैः स्वरैः स्वरूपान्तरंगतया षोडशविकाराणां त्वगादिधातुवदप्रकटत्वात्, तन्मध्ये योगिन्यो गुप्ताः संस्थिताः, अन्तरङ्गतया अन्तरङ्गमन्तरिन्द्रियं बुद्धि तच्चमत्कारमयत्वात् एता अप्यन्तरङ्गा अत एव गुप्ताः सर्वाशापूरणाख्ये च, योगिन्य इत्यत्र छान्दसत्वात् द्वितीयार्थे प्रथमा । कामाकर्षणरूपाद्याः “कामाकर्षिणीरूपा” इत्यादिचतुःश्लोकीप्रागुक्ताः सृष्टिप्राधान्यतः सृष्टौ वामाचक्रस्यैव प्राधान्यात्, अस्य चक्रस्य सृष्टिरूपत्वात् तत्स्था योगिनीर्वामेन पूजयेत् वामावर्तक्रमेणार्चयेत् । विकारषोडशविलासभूताः प्राणादिदशवायूनां जगत्प्राणनादिव्यापारात्मिकाः सबिन्दुषोडशस्वरैः कलिताः प्रत्येकं तन्मयीः अन्तरङ्गचिदनुप्रविष्टषोडशविकारतया गुप्ताः कामाकर्षिण्याद्याः कलाः सर्वाशापरिपूरके चक्रे वाममार्गे पूजयेदित्यर्थः ॥

एतासां ध्यानमाह

पाशाङ्कुशकरा एता रक्ता रक्ताम्बरावृताः ।

तच्चक्रदेवतार्चनसिद्धिमाह

प्राणशुद्धिमयी सिद्धिर्लघिमा भोक्तुरात्मनः ।

“आनन्दवातं सुधया स्नुतोदकमिति[1]” श्रुत्युक्तरीत्या विश्वप्राणनरूपया सुधया सह यदेकमपानम् अनिति प्राणिति तस्मिन् स्वकारणे लयः प्राणादीनां वा

---

१ क० पु० स्तुतोदकमिति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

Prakrityashtaka. There are Prakriti, Mahat, Ahangkāra and the five Tanmātras. Prakriti is the Prakriti of all and the other seven are each of them the Vikriti of that which precedes & Prakriti of that which follows it.

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पूर्वां शुद्धिर्नाम । अत्र प्राणस्याहो वायुमात्रोपलक्षणपरः तेन वायुलयलक्षणायां तु शुद्धौ मनोलयलक्षणः समाधिर्भवति । ततस्तदेकरसभूतस्य भोक्तुरात्मनो जीवस्य यष्टुः तद्गुणे ऽणिमा सिद्धिर्भवति ॥

त्रिपुरेशी च चक्रेशी पूज्या सर्वोपचारकैः ।

यादृशैरेवोपचारैः सर्वाशापूरचक्रेशी पूजिता तादृशैरेवोपचारैः सर्वाशापूरणे चक्रेशी त्रिपुरेशी पूजनीयेति सहम् ॥

तृतीयचक्रे पूजां सवासनामाह

अकृत्यष्टकरूपाद्याः कवर्गाद्यष्टवर्गगाः ।
अनङ्गकुसुमाद्यास्तु सर्वसंक्षोभकारके ॥
चक्रे चात्यन्तरङ्गत्वादेता गुप्ततरा मताः ।
पाशाङ्कुशधनुर्बाणकरा रक्ताः समर्चयेत् ॥
कौलिकानुभवाविष्टबोधपुर्यष्टकाश्रिताः ।
वाग्भवाष्टकसंबन्धात् सूक्ष्मवर्गः स्वरूपतः ॥
तास्तु गुप्ततराः सर्वाः सर्वसंक्षोभणाह्वये ।
अनङ्गकुसुमाद्यास्तु ॥

कुलं षट्त्रिंशत्तत्त्वमयं शरीरं तद्विषयानुभवः कौलिकानुभवः, कृशोऽहं स्वस्थोऽहमित्यादि तेनाविष्टो जीवः तदाश्रयतया तस्य बोधः पुर्यष्टकम्

"चितिः चित्तं च चैतन्यं चेतनाद्वयकर्म च ।
जीवः कला च देवेशि सूक्ष्मपुर्यष्टकं मतम् ॥"

इति स्वच्छन्दसंग्रहोक्तसूक्ष्मपुर्यष्टकं तदाश्रितास्तन्मयतया वाग्भवमेकारात्ज्ञानशक्तीनां मता वा मूलता च षट्[1] इति । कोऽर्थः मूलोत्थितायाः इच्छाशक्तेः कुलं

passage at foot of p. 180 follows this.

?

[1] क० पु० वर्गः इति पाठः ।

Pages 177, 178, 179, 180, 181, 182, marked with red pencil in the margin seem to be doubtful. On receiving another copy of it for which I am searching, the doubts will be cleared.

हरप्रसाद

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

कुण्डलिन्याः अकुलस्थेनाकारेण संघट्टे सति एकारो जायते उन्मेषशक्तिरूपायास्तस्या एवाकुलसंघट्टे सति ओकारो जायते तयोरेवाकुलसंघट्टे सत्यैकारौकारौ जायते इत्यर्थः । तदुक्तं सारपञ्चाशिकायाम्

“अनुत्तरानन्दमयीमिच्छाशक्तौ नियोजिते ।
त्रिकोणमध्यषट्कोणमिच्छायां हृष्टिमागते ॥
त एवोन्मेषकंयोगेनं क्रियाशक्तौ स्फुटं वपुः ।
उक्तं त्रिशक्तिसंघट्टं त्रिशूलं श्वेतपस्करम् ॥”

इति ॥ मिश्रेच्छाभावितैरपि ।

इच्छेषणान्तरारूढाः स्फुटास्फुटगतागताः ।
चत्वारः पुरतो वर्णाः षण्ढात्मानः प्रचोदिताः ॥

इति पञ्चाशिकोक्तरीत्या अकुलेषणाभ्यां मिश्रेच्छाभाविताः षण्ढा ऋॠऌॡवर्णाः तैरपि तत्र ह्रस्वत्वं प्राहुर् अत एवाकुल एको वर्णः द्वितीयो वर्ण इच्छात्मकः उन्मेषो परः षड् षण्ढं ह्रस्वद्वयं च एकारैकारौकारौकाराश्चेति नवस्वरा भवन्ति वेद्योन्मुखरूपसावर्णैः

तत्त्ववाचिनि बीजे तु सादिमायान्तिमं जगत् ।
विलुप्तप्रत्ययाकारमेतत् स परिक्षिप्यते ॥

इति पराप्रपञ्चाशिकोक्तरीत्या वेद्यस्य षट्त्रिंशत्तत्त्वात्मनः संकल्परूपा इषवः पुष्पमया इषवा इति तन्त्रान्तरे एवम् अनित्याशुचिरूपसंसारलक्षणं परमदौर्भाग्यं विहाय तस्य नित्यशुद्धपरमप्रेमास्पद सर्वस्पृहणीयपरमशिवस्वरूपप्रकाशनमेव सौन्दर्यं तदेव गुणः तेन संयुता तदेकरसतया चक्रेश्वरी सर्वसंक्षोभणाख्यं तृतीयचक्रेश्वरी कोऽर्थः विनायकपाशाद्यादिविघ्नप्रशमातुः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

क्षेत्रतस्य पिण्डपदरूपरूपातीतविश्रान्तिरूपलक्षणा तन्नि-
तयपुरातनी तदेकरस्यसौन्दर्यशालिनी त्रिपुरसुन्दरी तृ-
तीयचक्रेश्वरीत्यर्थः । बुद्धिशुद्धिरूपा बुद्धेः शुद्धिर्नाम वि-
षयसंसर्गं विहाय निर्विकल्पचिदात्मत्वम् तद्रूपा तएव
महिमा सिद्धिरूपा बुद्धेरविषयोपरागात् चिदात्मनो महि-
मा महत्त्वं सिद्ध्यति तत्सिद्धिरूपा चक्रेश्वरी सर्वोपचारकैः
पूर्वोक्तचक्रादिभिरभ्यर्च्ये ।

चतुर्थचक्रे पूजां सवासनामाह

द्वादशग्रन्थिभेदेन समुल्लसितसंविदः ।
विसर्गान्तदशावेशाच्छाक्तानुभवपूर्वकम् ।

ग्रन्थिः षट्चक्राणां प्रत्येकमूर्ध्वाधोग्रन्थिद्वयं द्वयमिति
द्वादश ग्रन्थयः अत्रैव वक्ष्यति

द्वादशग्रन्थिभेदेन वर्णा नाड्यन्तरे स्थिते ।

इति समुल्लसितायाः उत्क्रान्तायाः संविदः कुण्ड-
लिन्याः द्वादशग्रन्थिभेदेन विसर्गान्तदशावेशात् वि-
सर्गः षोडशस्वरः तेन विसर्गशब्देन षोडशसंख्या
गृह्यते अतो विसर्गान्तं षोडशान्तम्

यत्षोडशकलाकारं भूतान्तव्योमगं च यत् ।
षोडशान्तमिति ख्यातं व्योमस्थानेन्दुमण्डलम् ।

इति स्वच्छन्दसंग्रहोक्तेः तदेव दशा चिदाधार-
त्वात् तदावेशः तदापत्तिः तदुक्तमत्रैव

व्योमेन्दुमण्डलासक्ता सुधास्रोतःस्वरूपिणी ।

इति शाक्तानुभवपूर्वकं मूलोत्थितायाः कुण्डलिन्याः
षट्चक्रग्रन्थिसंघातभेदक्रमेण व्योमेन्दुमण्डलासक्तेः
परिकलनमेव शाक्तानुभवः तत्पूर्वकं भाविवर्णोत्प-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ति रिति क्रियाविशेषणं। त्रैलोक्यमोहनादिचक्रत्रये वैखरीमय-
तोवासना प्रोक्ता सर्वसौभाग्यदायिकादिचक्रत्रये भूतलिपिमध्य-
मामय वासनामाह

उन्मेषशक्तिप्रसरैरिच्छाशक्तिप्रधानकैः।
तथैवाकुलसंघट्टरूपैर्वर्णचतुष्टयैः॥
वैद्योषरूपसाद्यैर्मिश्रेच्छाभावितैरपि।
कुलशक्तिसमावेशरूपवर्णद्वयान्वितैः॥

अकुलसंघट्टरूपैः अकुलं ब्रह्मरन्ध्राधोमुखमितसहस्रद-
लकमलं तत्रस्थः

अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः।

इति संकेतपद्धत्युक्तोऽकारः परमशिवात्मकः अकुलशब्देन
लक्ष्यते तेन संघट्टः संबन्धः तद्रूपैः इच्छाशक्तिप्रधानकैः
इच्छाशक्तिरेकारः उन्मेषशक्तिप्रसरैः उन्मेषग्रन्थिरुकारः
तदुक्तं परापञ्चाशिकायाम्

अनुत्तरेच्छा उन्मेष आनन्देशानमूनता ।
क्रियेच्छा नामकेन संबन्धः सूक्ष्मवैखरी॥

वर्णाष्टवर्गाः तदुक्तं स्वच्छन्दसंग्रहेऽपि

अ स्थूलं पञ्चदशाकारं सूक्ष्ममष्टाष्टकं मतम्।

इति तत्त्वरूपाः तदात्मकत्वात् गुप्ततराः सूक्ष्मवैखरी-
वर्णवर्गात्मकमयत्वात् एता अपि सूक्ष्मा अनाद्यन्तान्तरङ्ग- p. 277
तया गुप्ततरा इत्यर्थः। ताः सर्वा अनङ्गकुसुमाद्याः पू-
र्वे इत्यादिचतुःशतीश्लोकोक्ताः सर्वसंक्षोभणाख्ये तृतीय-
चक्रे अष्टदलकमले पूज्या इति॥

तासां ध्यानमाह

[- - - - - - -] रक्तकञ्चुकशोभिताः।
वेणीकृतलसत्केशाश्चापबाणधराः शुभाः॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तत्तदाकारबुद्ध्यात्मभोग्यभोक्तृमहेशितुः ।
पिण्डादिपदविश्रान्तिः सौन्दर्यगुणसंयुता ॥
चक्रेश्वरी बुद्धिरूपा च परमेश्वरि ।
महिमासिद्धिरूपा च पूज्या सर्वोपचारकैः ॥

इन्द्रियद्वारा बहिर्निर्गत्य तत्तदाकारतत्तदिन्द्रियार्थाकाराकारिता बुद्धिरन्तःकरणपरिणतिः तदात्मानो भोग्याः शब्दस्पर्शरूपरसगन्धास्तेषां भोक्ता प्रमाता स एव महेशिता भूपतिः क्षेत्रज्ञ इति यावत् तस्य पिण्डादीनां पिण्डपदरूपरूपातीतानां स्थानानां विश्रान्तिरूपातीते तुरीयपदे मुक्तिः अत्र प्रमाणवचनम्

पिण्डे मुक्ताःपदे मुक्ता रूपे मुक्ताः षडानन ।
रूपातीते च ये मुक्तास्ते मुक्ता नात्र संशयः ॥

इति । सैव सौन्दर्यवचनात् एवंभूतः स आदिर्यस्य हकारस्य स एव वेद्योभरूपः सादिः हकारः तदाद्यवर्तेः अत्रैकं आदिशब्दोऽध्याहार्यः हयराः कुलशक्तिसमावेशरूपवर्णद्वयान्वितेः कुलशक्तिः कुण्डलिनी तस्याः समावेश उद्भयविश्रान्तिस्थानद्वयम् आधारब्रह्मरन्ध्रमयं तद्रूपं वर्णद्वयं वकारलकारात्मकं

आधारपङ्कजं पीतं चतुष्पत्रं सकेसरम् ।

इत्यादि पार्थिवं पङ्कजं ह्येतत् इत्याद्यन्तेन स्वच्छन्दसंग्रहोक्तरीत्या आधारपङ्कजस्य पार्थिवतया लकारः

ब्रह्मरन्ध्रे यावदूर्ध्वे कुलपद्मं महेश्वरि ।
श्वेतं सकेसरोपेतं सहस्रारमधोमुखम् ॥

इत्यादि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

व्यापिनी केवला शक्तिरमृतोघप्रवर्षिणी ।

इत्याद्यन्तेन स्वच्छन्दसंग्रहोक्तरीत्या अमृतमयो वकारः एतद्वर्णद्वयान्वितैः । कोऽर्थः कुलशक्तेरिच्छात्मिकायाः कुण्डलिन्या उन्मेषात् षड्वक्रपञ्चगगनद्वादशग्रन्थिभेदक्रमेण कुलसमावेशात् अइउऋऌएऐओऔहयवरल इति वर्णचतुर्दशकमुत्पद्यते । तदुक्तमागमसागरे भूतलिप्युद्धारप्रसङ्गे पञ्चह्रस्वाः संधिवर्णा व्योमवाय्वग्निजलधरा इति तन्मयं चतुर्दशारचक्रमित्यर्थः ॥

संप्रदायक्रमायात सौभाग्यदायकशब्दयोर्नामनामाह

शक्तेः सारमयत्वेन प्रहृतत्वान्महेश्वरि ।
संप्रदायक्रमायाता चक्रे सौभाग्यदायके ॥
निरन्तरप्रथारूपसौभाग्यबलयोगतः ।
अन्वर्थसंज्ञके देवि अणिमासद्दृशीस्तु ताः ॥ : शुचा
सर्वसंक्षोभिणीपूर्वाः ।

शक्तेः इच्छाशक्तेः कुण्डलिन्याः साराः प्रसाराः पूर्वोक्तरीत्या अकुलस्थानस्थानुत्तरशिवसंसर्गः तन्मयत्वेन तदुत्पन्नत्वात् एतेन वर्णानां नैर्मल्यैः प्रहृतत्वात् सर्वसंक्षोभिण्यादिशक्तीनां संप्रदायक्रमायातत्वञ्च

"संप्रदायमहाबोधरूपो गुरुमुखे स्थितः ।"

इति पूर्वोक्तरीत्या गुरुमुखावगतत्वात् वर्णोत्पत्तेः आसां च तन्मयत्वात् अत एताः संप्रदायक्रमायाता इत्यर्थः । अणिमासदृशीः "ताभ्यु रक्ततरा वर्णेति" पूर्वोक्ताणिमासिद्धिसदृशीः "सर्वज्ञा सर्वशक्तिश्चे"त्यादि चतुःशतीशास्त्रोक्ताः निरन्तरप्रथाः अन्तर एव भेदो निरन्तरप्र-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

था शिवाद्वैतभावना सैव सौभाग्यं परमसुभगपरमेशास्व-
परशिवाभेदगोचरत्वात् तदेव बलं शक्तिः तद्योगः अ-
नित्याशुचिरूपपरमदुर्भगसर्वजुगुप्साभेदलक्षणसंसार-
परिपन्थिपरमेशास्पद सर्वस्पृहणीयपरमसुभगपरशि-
वाहन्ता लक्षणसौभाग्यप्रतिपादनशक्तिसंयोगात्
अन्वर्थसंज्ञके अनुकूलार्थादरशालिनि संज्ञा भवति।
सौभाग्यकारके चक्रे संपूजयेदित्यनुषङ्गः ।

देहात्मादिविशुद्धिदा ।
ईशित्वसिद्धिरपि च भोक्तृरूपे पुरत्रये ॥
योगादिक्लेशभेदेन सिद्धा त्रिपुरवासिनी ।
एताः संपूजयेद्देवि सर्वाः सर्वोपचारकैः ॥

देहः षट्त्रिंशत्तत्त्वसमुदायलक्षणः, तच्छब्देन त-
दहन्ताभिमानी प्रमाता लक्ष्यते। अक्षाणि इन्द्रियाणि
प्रमाणानि आदिशब्दाद्विषयाः प्रमेयरूपा गृह्यन्ते।
तेषां शुद्धिः चिदेकविश्रान्तिः तत्प्रदा। तस्यां शुद्धौ
पशुरीशित्वं स्वातन्त्र्यं सिद्ध्यति। स चात्र भोक्तृरूपे प्रमा-
तृमानमेयलक्षणे पुरत्रयेऽपि निर्वाहशीलत्वात् अ-
त्रैव वक्ष्यति

"मातृमानप्रमेयाणां पुराणां परिपोषिणी।"

इति। योगादिक्लेशभेदेन "आत्मा मनसा संयुज्यते मन
इन्द्रियेणेन्द्रियमर्थेन इन्द्रियाणां प्राप्यकारित्वनिय-
मात् ततोऽप्यर्थसंनिकृष्टेन्द्रियेणेति" तन्त्रान्तरोक्तरीत्या
मातृमानप्रमेयेषु तत्तद्रूपेण चिन्मरीचीनां प्रसरः त-
त्समवायो योगः; स एवादिक्लेशः अष्टाङ्गादयावि-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

च्छिन्नसंविदात्मनो ज्ञानेन्द्रियविषयात्मना बहिरुपराग एव लेपः क्लिष्टत्वं तद्भेदेन प्रत्यङ्मुखतया तदैकरस्येन परप्रमातृविश्रान्तिभेदः। तदुक्तं परापञ्चाशिकायाम्

“सर्वसंविन्नदीभेदाभिन्नविश्रान्तिभूमये।
नमः प्रमातृविषयप्रावचेतन्यसिन्धवे॥”

इति स्तोत्रावल्यामपि

“यत्र यत्र मिलिता मरीचयस्तत्र तत्र विभुरेव जृम्भते।”

इति स्थित्या स्थिता त्रिपुरवासिनी पूर्वोक्तपुरत्रयविश्रान्तिरूपिणी चतुर्थचक्रेश्वरी, एताः पूज्यावरणदेवताः सिद्धिचक्रेश्वरीयुताः सर्वाः सर्वोपचारैः गन्धादिभिः पूजयेत्॥

पञ्चमचक्रपूजां सवासनामाह

सदातनानां नादानां नवरन्ध्रस्थितात्मनाम्।
महासामान्यरूपेण व्याप्तध्वनिरूपिणी॥
अस्थिरस्थिरवेद्यानां छायारूपैर्दृगर्णकैः।
कुलकौलिकयोगिन्यः सर्वसिद्धिप्रदायिकाः॥

सदातनानां यावच्छरीरीभाविनानां नादानाम् अविकतमूर्च्छस्पर्शनादध्वनिबिन्दुशक्तिबीजाक्षरारब्धानां नवरन्ध्रस्थितात्मनां नवरन्ध्राणि नवाधाराणि सुषुम्नान्तर्गगनरूपत्वात् आधारस्वाधिष्ठानमणिपूरकानाहत तद्वज्र! कण्ठक-लम्बिका विशुद्धाज्ञाख्यानि। तदुक्तं स्वच्छन्दे

“आधारं स्वाधिष्ठानं च मणिपूरमनाहतम्।
मध्यमं पद्मकण्ठं च लम्बिकां च विशुद्धिकाम्॥
आज्ञां च नवकं विद्धि षट्चक्राणि त्रिहीनकम्।”

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इति। तेषु स्थितात्मनां महासामान्यरूपेण महदाद्यन्तरस्थित-
निर्विशेषध्वनिलक्षणं सामान्यं समष्टिः तद्रूपेण व्यावृत्तध्व-
निरूपिणी. एवं व्यावृत्तो नादाविभक्तो दशधा ध्वनिः तद्रूपि-
णी, अविकृतादिनादमयसूक्ष्ममध्यमारूपिणीत्यर्थः। अ-
स्थिरस्थिरवेद्यानां अस्थिरवेद्यानि कर्मेन्द्रियगोचरतया क्रि-
यारूपाणि वचनादानगमनविसर्गानन्दाख्यानि, स्थिरवे-
द्यानि ज्ञानेन्द्रियगोचराः शब्दस्पर्शरूपरसगन्धाः, तेषा-
मस्थिरस्थिरवेद्यानां छायारूपैः प्रतिबिम्बभूतैः दशा-
र्णैः टतवर्गद्वयदशार्णैराविष्कृता इति शेषः कुल-
कौलिकयोगिन्यः अत एव कुलस्य देहस्यावयवभूतानि
दशेन्द्रियाणि कुलशब्देनोच्यन्ते। तत्संबन्धात् तत्संग्राह्या
दश विषयाः कौलिक इत्युच्यते। तयोर्योगः संबन्धः का-
र्यकारणलक्षणो यासां ताः कुलकौलिकयोगिन्यः। ननु
भूतलिपिक्रमे क्रमप्राप्तौ कवर्गचवर्गौ कथं टतवर्गौ अ-
स्मिन् दशारे व्युत्क्रमेण कथ्येते। उच्यते, चतुर्दशार-
द्वयचक्राणां स्थितिरूपत्वात् भूतलिपेर्मध्यमावयवत्वा-
त् मध्यमायाश्च स्थितिरूपत्वात् स्थितिक्रमोऽयं वर्णव्य-
त्ययः अत एव तत्कारणभूतसूक्ष्ममध्यमानादमयसंज्ञा-
कथनम्। अस्य चक्रस्य सर्वसिद्धिप्रदायिकाः सर्वस्य प्र-
वोक्तस्य ज्ञानेन्द्रियविषयजातस्य सिद्धिः प्रतीतिः प्रमा-
तृविश्रान्तिः तल्लक्षणायाः प्रतिपादिकाः ॥

आसां ध्यानमाह

श्वेता वराभयकराः श्वेताभरणभूषिताः।
स्मरम् ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सर्वार्थसाधकचक्रोत्पत्तिमाह

स्वप्रथामननत्राणयोगादन्वर्थसंज्ञके ।
सर्वसिद्धिप्रदाद्यास्तु चक्रे सर्वार्थसाधके ॥

सर्वसिद्धिप्रदाद्याः "सर्वसिद्धिप्रदा देवीरिति" चतुःषष्टीप्रस्तुतोक्ताः मन्त्राणां पूर्वोक्तनिर्वचनानां स्वप्रथायोगात् स्वस्य शिवात्मनः स्वसाधकस्य प्रथा शिवाहं भावभावना, तदेव मननत्राणं तद्योगात् अन्वर्थसंज्ञके सर्वार्थसाधकपदानुकूलार्थवत्संज्ञायुक्तमिति शिवाहंभावभावनालक्षणमननात् सर्वेषां स्वसाधकानामर्थं परमप्रयोजनं मोक्षं साधयतीति योगात् सर्वार्थसाधके चक्रे संस्थिता इति शेषः ॥

स्वनामपदार्थव्युत्पत्तिपुरःसरमेतच्चक्रेशीमाह

लोकत्रयसमृद्धीनां हेतुत्वाच्चक्रनायिका ।
त्रिपुराश्रीर्महेशानी ॥

लोकयतीति लोको लोक्यतेऽनेनेति च व्युत्पत्त्या लोकत्रयस्य मातृमानमेयलक्षणस्य समृद्धीनां परिपूर्णपरप्रमातृविश्रान्तिलक्षणानां हेतुत्वात् त्रिपुराश्रीः पञ्चमचक्रेशी पूज्येत्यर्थः ॥

मन्त्रशुद्धिमवाप्य पुनः ।
वशित्वसिद्धिराख्याता एताः सर्वाः समर्चयेत् ॥

मन्त्राणां शुद्धिर्नाम "अकुले विषुसंज्ञे चे"त्यादि पूर्वोक्तरीत्या उन्मनीपर्यन्तं कलाबीजलक्षणोच्चारणेन चिन्मयान्तर्भावनं तादृश्या मन्त्रशुद्ध्या स्वसाधकस्य वशित्वं जगत्सर्वं प्रभृतं जगत्सर्जनसंहारावस्थायत्तत्वं स्वातन्त्र्यं सिद्ध्यतीति; तादृशी परशिवताप्राप्तेः सा चास्मिन् चक्रे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

वशित्वसिद्धिरिति एताः सर्वा आवरणदेवताः चक्रेश्वरी-सिद्धियुताः समर्चयेत् ॥

षट्चक्रपूजां समासेनाह

ऊर्ध्वाधोमुखया देवि कुण्डलिन्या प्रकाशिताः ।
कुलेच्छया बहिर्भावात् कादिवर्णत्रयामयाः ॥
निर्गर्भयोगिनीवाच्याः स्वरूपारूपवेश्मके ।
सर्वरत्नाकरे चक्रे सर्ववेश्माकरे पराः ॥
सर्वज्ञाद्याः स्थिताश्च ।

ऊर्ध्वाधोमुखया "यदोल्लसतीत्यादि" चतुःशतीश्लोकोक्त-रीत्या अकुलपरशिवरूपप्राप्तये ऊर्ध्वमुखया, पुनरधोमुख-या विश्वरूपाये मूलाधारं प्रविशन्त्या कुण्डलिन्या प्रका-शिता अभिव्यञ्जिताः कारणसत्त्वात् कुलेच्छया, कुल-शक्तलक्षणं मातृमानमेयरूपं तवेच्छया तन्निर्माणेच्छया बहिर्भावात् कादिवर्णत्रयामयाः षट्त्रिंशत्तत्त्वसंज्ञेनरू-पतत्त्वत्रयमयमातृमानमेयलक्षणनिर्माणेच्छया कुल-स्यपरशिवात् बहिः प्रकृतया समस्ततत्त्ववर्णगर्भिन्या कुण्डलिन्या ककारादिदशवर्णप्रत्याहृत्या निर्मितेत्यर्थः। निर्गर्भयोगिनीवाच्याः निर्गर्भयोगिन्य इति वचनाः निर्ग-

"निर्गर्भोऽपि महादेवि शिवशुद्धात्मगोचरः ।"

इति पूर्वोक्तरीत्या अद्वैतश्रयालक्षणः परप्रमातुः योगः आसां योगिन्यो विषयेन्द्रियसंसर्गलक्षणा दशेन्द्रियवृ-त्तयः चिन्मरीचयो निर्गर्भयोगिन्यः स्वरूपावेशरूपके स्वरूपस्य साधकात्मनः प्रमातुरावेशः पराशिवोऽहमिति

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मतिः, आवेशो हि लोके ब्रह्मराक्षसोऽहमिति पराहन्ता-
प्रथा, तद्रूपे तन्निरूपके अत एव सर्वावेशाकरे "यत्र यत्र
मनो याती"त्यादि "तत्र तत्रानमार्गेण चैतन्यं व्यज्यते प्रभोः"
इति विज्ञानभैरवभट्टारकोक्तरीत्या सर्वत्र तत्पदावेशः
तदभेदेन स्वस्यैव स्फुरणं करोतीति सर्वावेशाकरे चक्रे
अष्टचक्रे सर्वरक्षाकरे "कालेभ्यो रक्ष्यतामन्त्रमिति व-
चनात् प्रतिकूलपदार्थात् उपहतिपरिहारो रक्षा
नाम सर्वस्माद्भेदप्रपञ्चलक्षणात् परिपन्थिनो रक्षा प-
रशिवाभेदप्रतीतिरूपा, तत्करे परः परशिवाद्वैतप्र-
तिपादनपरत्वात् उत्कृष्टत्वात् सर्वज्ञाद्याः सर्वशक्तिः "सर्वज्ञा"
इत्यादिचतुःशतीप्रागुक्ताः स्थिताः ।

तासां ध्यानमाह

एताः सहपुस्ताक्षमालिका ।
पुस्तं पुस्तकं शिष्टं स्पष्टम् ॥
नाम व्युत्पत्तिपुरःसरं चक्रेशीमाह

मातृमानप्रमेयाणां पुराणां परिपोषिणी ।
त्रिपुरामालिनी ख्याता चक्रेशी सर्वमोहिनी ॥

पुरचित्स्पन्दनिवासात्मानि प्रमेयाण्येव पुराणि ते-
षां पुराणां परिपोषिणी सर्वेषां स्वत्रयाप्रदानेनोप-
बृंहिणी अत एव त्रिपुरामालिनी ख्याता निरुक्ता
चक्रेशी सर्वमोहिनी अत एव तत्कृतमोहवशादेव
हि मातृमानमेयरूपाभेदप्रथा तदुक्तं परापञ्चाशिकायाम्
"स्वाङ्गभूतेषु भागेषु मायातत्त्वं विभेदधीः ॥"

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

इति ॥

विद्याप्राप्तिं विशुद्धिं च सिद्धिं प्राकाम्यसंज्ञिताम् ।
एताः सर्वोपचारेण पूजयेद्देवताः क्रमात् ॥

मन्त्राः पुंरूपवाच्याधिष्ठिताः विद्याः स्त्रीरूपवाच्याधिष्ठिताः, अत एव विद्याप्राप्तेः सौभाग्यविद्यावर्णवाच्यायाः षट्त्रिंशत्तत्त्वमय्याः शुद्धिः तदतीतपरचिल्लक्षणेन तद्रूपां प्राकाम्यसंज्ञितां सिद्धिं कामनानुरूपलक्षणाम् । तदुक्तं महाकविभिः

"द्रवः संघातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः ।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु ॥"

इति । एता देवताः सर्वज्ञाद्याः चक्रेशीसिद्धिमुद्रायुताः क्रमात् प्रथममावरणदेवताः पश्चात् चक्रेशी ततः सिद्धिमिति क्रमात् सर्वोपचारेण । जातावेकत्वं सर्वोपचारैः पूजयेदित्यर्थः ॥

सप्तमचक्रे पूजां सवासनामाह

निरुद्धवायुसंघट्टस्फुटितग्रन्थिमूलतः ।
हृदयान्तरसंवित्तिः[1] शून्यपुर्यष्टकात्मना ॥ ७।
बीजरूपस्वरकलास्पष्ट[2]वर्गानुसारतः ।
रहस्ययोगिनीर्देवि संसारदलनोज्ज्वले ॥
सर्वरोगहरे चक्रे यजेद्वाग्देवताष्टकम् ।
वशिन्याद्या ।

निरुद्धयोः परिहृतस्वैराचारयोः वाय्वोः संघट्टात् प्राणापानयोः
न्यः "गुदमाकुञ्च्य बहुधा: प्राणापानौ संयोज्य" इत्यभियुक्तवचनोक्तरीत्या मूलादुत्थितायाः कुण्डलिन्याः तमो

१ क० पु० संवित्तिरिति पाठः । २ क० पु० स्पष्टेति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

"ततो हृदयपद्मान्तः स्फुरन्तीं संविदं कलाम् ।"
इत्यभियुक्तवचनोक्तरीत्या हृदयान्तरे स्फुरन्त्याः संवित्तेः चिदात्मनः

"चितिश्चित्तं च चैतन्यं चेतनेन्द्रियकर्म च ।
जीवः कला च देवेशि सूक्ष्मपुर्यष्टकं मतम् ॥"

इति स्वच्छन्दसंग्रहोक्तरीत्या सूक्ष्मपुर्यष्टकानां सूक्ष्मतया दुर्लक्ष्यत्वात् शून्यमित्युच्यते "हृत्पुण्डरीकं पुरमध्यसंस्थितम्" इति श्रुत्युक्त्या पुरं शरीरं चिदष्टकरूपं सूक्ष्मशरीरं शून्यपुर्यष्टकं तदात्मना तद्रूपेण एता इत्यनुषङ्गः ।

"द्विधेयं मातृका देवी बीजयोन्यात्मना स्थिता ।"

इति परापञ्चाशिकोक्तरीत्या बीजरूपा आदिस्वरा अकारादिविसर्गान्ताः षोडश स्वराः कलाः ताभिः स्वस्ववर्गेण युता वर्गाः कचटतपयशाः तेषामनुसारतः

"अवर्गः प्रथमो देवि वह्निनी तत्र संस्थिता ।"

इत्यादिरीत्या स्वस्ववर्गत्वात् "उद्धरेत्प्रथमं रेफमित्यादिषु चतुःशतीशास्त्रोक्त स्वस्वबीजानुसारतः क्रमात् स्वस्ववर्गान्ते स्वस्वबीजमुद्धार्य पूजयेदित्यर्थः ॥ ननु चतुर्दशकोणादिषु पूर्वोक्तचक्रेषु देवतानां भूतलिपिमातृकास्वरनवकहादिपञ्चककचटतपवर्गमयत्वमुक्तम् अष्टकोणादिदेवतानां किमिति शिष्टवर्गशषसमयत्वं नोक्तम् । उच्यते, चतुर्दशकोणादिचक्रेषु देवतानामकारादिभूतलिपिवर्गमयताकथनेनैव शिष्टवर्गशषसमयत्वम् अष्टकोणदेवताबीजमनुक्रममपि अवगन्तव्यं, बीजरूपस्व-

१ क॰ पु॰ स्वस्येति पाठः ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

रक्ताः स्वस्ववर्णानुसारेण इति तु वशिन्यादिदेवतापूजामन्त्रकथनं रहस्ययोगिनी रहस्यमन्त्ररहस्यं पुर्यष्टकं तेन सह योगः संबन्धः कार्यकारणलक्षणो यासां ताः वशिन्याद्या योगिन्यः, अत एव सर्वे एवानित्याशुचिक्लेशरूपसंसारो रोगः तस्य हरणात् रहस्यतया पुर्यष्टकमयत्वात् गोपनीयाः, संसारदलनोज्ज्वले अनित्याशुचिक्लेशरूपभेदः संसारः तस्य दलनेन हरणेन उज्ज्वले परप्रकाशतावन्मात्रे, अत एव सर्वरोगहरे चक्रे सर्व एव अनित्याशुचिक्लेशरूपसंसारो रोगः तस्य हरणे पटुः प्रभावशालिनि सप्तमचक्रे संस्थिता वशिन्याद्याः

"अवर्गः प्रथमो देवि वशिनी तत्र संस्थिता ।"

इति चतुःशतीशास्त्रोक्ताः पूजयेदित्यनुषङ्गः ॥

तासां ध्यानमाह

रक्तवर्णा वराभयमुद्रिताः ।
पुस्तकं जपमालाञ्च दधानाः सिद्धियोगिनीः ।

सिद्धः परमशिवः तेन योगः संबन्धः पुर्यष्टकात्मतया तस्य जीवस्य जीवतापादनलक्षणः तद्वतीः[1] शिष्टं स्पष्टम् ॥

शुद्धविद्याविशुद्धिं च [2]उत्कसिद्धिं महेश्वरि ।
ईश्वरीं त्रिपुरासिद्धिं पूजयेद्विन्दुतर्पणैः ॥

"अहन्तेदन्तयोरैक्यमिति विद्या निगद्यते ।"

इति परापञ्चाशिकोक्तरीत्या शिवाद्वैतप्रथालक्षणायाः शुद्धविद्यायाः विशुद्धिः

"ज्ञानेन ज्ञानमालोक्य पश्चाज्ज्ञानं परित्यजेत् ।"

इति वचनप्रतिपादितरीत्या ज्ञातृज्ञानविभागशून्यनिर्विकल्पबोधस्वरूपलक्षणपरशिवसमावेशः तद्रूपिणीं

१ क० पु० सिद्धि इति पाठः। २ क० पु० उत्कासिद्धिमिति पाठः।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

अत एव मुक्तिसिद्धिं

"विश्वं शिवादिभूम्यन्तं चमत्काररसात्मकम्।
महीयसे महाभोक्त्रे महेशाय निवेदयेत्॥"

इत्यभियुक्तोक्तरीत्या महामुक्तिं विश्वविषयिणीं स्वसाधकस्य सिद्धयति। तां चेश्वरीं सप्तमचक्रेश्वरीं त्रिपुरासिद्धिं मानृमानमेयरूपिणीं त्रिपुराणां उत्तीर्णशिवात्मलक्षणां सिद्धिं बिन्दुतर्पणैः सान्ततकुसुमैः पूजयेदिति॥

अष्टमचक्रेशीपूजां सवासनामाह

"शक्तित्रयात्मिका देवि विद्धामप्रसराः पराः।
संवर्ताग्निकलारूपाः परमातिरहस्यगाः॥
पूर्णपूर्णस्वरूपाद्याः सिद्धे हेतुमयेश्वरि[1]।
सर्वसिद्धिमयाख्ये तु चक्रे त्वायुधभूषिते॥
स्थिताः कामेश्वरीपूर्वा अष्टतः पीठदेवताः।"

शक्तित्रयात्मिकाः इच्छाज्ञानक्रियात्मिकाः, विद्धामप्रसराः विदः संविदः अम्बिकादीच्छादिधाम्नां किरणानां वामाज्येष्ठारौद्र्यात्मकानाम् उड्डीशषष्ठीशमित्रीशाख्यानां[2] प्रसराः स्पन्दभूताः सर्वावरणप्रधानभूतत्वात् संवर्ताग्निकलारूपाः संवर्ताग्निर्विश्वघस्मरः परशिवेश्वरः तस्य कला हकारः तद्रूपाः तदात्मिकाः शान्ताशक्त्यवयवभूतत्वात् परमातिरहस्यगाः परमः सर्वावरणदेवताभ्यः सर्वावरणप्रधानरूपत्वात् अतिरहस्या मनोबुद्ध्यहङ्काराः धामत्रयपरिस्फुरत्परचिदाधारभूतत्वात् अत्यन्तगोपनीयाः पूर्णपूर्णस्वरूपाद्याः पूर्णपरशिवसमावेशरूपत्वात् पूर्णस्वरूपाद्याः पूर्णतत्त्वमनु विश्वविषया सिद्धिः तादृश्याः

१ क० पु० मयमिति पाठः। २ क० पु० षष्ठीशमित्रीशेति पाठः।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सिद्धेर्हेतुः तदात्मिकायाः सर्वस्य क्षित्यादिशिवान्तस्य
परशिवविश्रान्तिलक्षणायाः सिद्धेः जीवन्मुक्तिहेतुतया स-
र्वसिद्धिप्रदाख्ये निरुक्तसर्वसिद्धिप्रदनाम्नि, आयुधभूषिते
कामकामेश्वर्योः आयुधैः

"धारचापं पाशाङ्कुशौ शरैरपि मिथुनीकृतैः।
पश्चिमोत्तरयोरस्य दक्षिणपूर्वक्रमेण तु॥"

इत्यादिचतुःशतीप्रथमोक्तरीत्या अलंकृते तेनायुधा-
नां कामकामेश्वर्योः कारणान्तःपातित्वात् सिद्धिचक्रे
अष्टमे स्थिताः, कामेश्वरीपूर्वाः "कामेश्वरीमग्निकोणे" इ-
त्यादिचतुःशतीप्रथमोक्ता अन्तरः पीठदेवताः पीठानि
"कापूजाउ इति क्रमादिति" पूर्वोक्तानि मनोबुद्ध्यहंकारचि-
त्तलक्षणानि तेषु संक्रान्तदेवताः परप्रकाशावयवभूताः
वामाज्येष्ठारौद्र्यम्बिका मित्रीश षष्ठीश उड्डीशचर्यानाथ-
मिवाङ्कस्थाः [1] तद्गतप्रकाशावयवभूतेच्छाज्ञानक्रिया-
शान्तामय कामेश्वरीवज्रेश्वरीभगमालिनीमहात्रिपुर-
सुन्दर्यः चतस्र इति नवचक्रदेवतया सह संकलनाद-
ष्टमचक्रे तु तिस्र एव कामेश्वर्याद्याः सायुधाः॥

आयुधदेवतानां ध्यानमाह

आयुधा अपि रक्ताभाः स्वायुधोज्ज्वलमस्तकाः।
वरदाभयहस्ताश्च पूजाध्यानफलप्रदाः॥
त्वदीयाश्च मदीयाश्च पुंस्त्रीवपुर्विधायिनः।

आयुधाः आयुधादिदेवताः छान्दसत्वात् पुंलिङ्गप्र-
योगाः, स्वायुधोज्ज्वलमस्तकाः स्वाधिष्ठितायुधपरिक-

---

१ क० ग० । मित्रीशषष्ठीशेति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्थितमल्लकाः

"महापद्मवनान्तःस्थां कारणानन्दविग्रहाम् ।
सर्वंकोपाश्रयां देवीमिच्छाकामफलप्रदाम् ।
भवतीम् ॥"

इति पूर्वोक्तरीत्या महापद्मवनान्तःस्थानाश्रिते स्मरस्य विश्वगुरोः समाङ्कस्थाया अनाश्रितकलायाः तव संबन्धिनो बाणधनुःपाशाङ्कुशाः स्त्रीवश्यविधायिन इत्यर्थः। तदुक्तं चतुःशतीशास्त्रे

"मादनैर्मदनो भूत्वा पाशाङ्कुशधनुःशरैः ।
क्षोभयेत् स्वर्गभूलोकपातालतलयोषितः ॥
तथैव शास्त्रैर्देवेशि त्रिपुरीकृतविग्रहः ।
क्षोभयेद्देवगन्धर्वसिद्धविद्याधरानपि ॥"

इति। स्वरूपमन्यत् ॥

पूर्वं चतुःशतीशास्त्रे नोद्धृतत्वात् शक्तिबीजान्युद्धरति

"त्वगसृङ्मांसमेदोस्थिमज्जार्णान्तः स्वरेश्वरि ।
द्वितीयस्वरसंयुक्ता एते बाणास्त्वदीयकाः ॥"

श्रीकण्ठादिन्यासपरिपाट्या त्वगादीनां पञ्चानां धातूनां यवर्णादयः पञ्च एते द्वितीयस्वरसंयुक्ताः बाणाः आकारो द्वितीयः स्वरः सामर्थ्याद्बिन्दुरपि लभ्यते। त्वदीयबाणाः तव संबन्धिनो बाणबीजानि, तत्र यकारस्त्वगात्मको रेफोऽसृगात्मकः, लकारो मांसात्मकः, वकारो मेदःस्वरूपः, अस्थिमज्जाधात्वोरुपरिस्थितेन शुक्रात्मकेन सकारेणापीति चतुःशतीशास्त्रेप्यनुक्तानां कामेश्वरबाणबीजानाम् [illegible]-

१ क० पु० शास्त्रैरिति पाठः ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

"शादौ षादौ वरेण्याख्यौ संयजेन्नीलरक्तयोः ।"

इत्यादिना स्वच्छन्दसंग्रहोद्धृतत्वात् आगमान्तरेषु प्रसिद्धत्वात् नात्रोद्धारः क्रियते ॥

वामादीनां पुराणां तु जननी त्रिपुराम्बिका ।
परस्वातन्त्र्यरूपत्वादिच्छासिद्धिर्महेश्वरि ॥
एताः सर्वोपचारेण पूजयेत् तु वरानने ॥

इति वामादीनामिति वामाज्येष्ठारौद्र्याख्यानां मित्रेशादिरूपाणां पुराणामिच्छाज्ञानक्रियामयविमर्शशक्त्यंशकामेश्वर्याद्यधिष्ठानत्वात् पुरशब्दवाच्यत्वम्, तेषां त्रिपुराणां जननी समष्टिरूपत्वात् अम्बिकाशक्तिः, एतत्त्रिपुराम्बिका निरुक्तचक्रेशीत्यर्थः ।

"स्वेच्छयैव जगत्सर्वं निगिरत्युद्गिरत्यपि ।"

इत्याद्यागमोक्तरीत्या परस्य शिवस्य विश्वसर्जनसंहारलक्षणस्वातन्त्र्यलक्षणेच्छासिद्धिः एतदर्चकस्य सिद्ध्यति, अतः सेयमिच्छासिद्धिरस्मिन् चक्रे स्थितेत्यर्थः । एता आयुधदेवताः कामेश्वर्याद्याः चक्रेशीसिद्धियुताः सर्वोपचारैर्गन्धादिभिः पूजयेत् ॥

नवमचक्रपूजां सवासनामाह

सर्वानन्दमये देवि परब्रह्मात्मके परे ।
चक्रे संवित्तिरूपा च महात्रिपुरसुन्दरी ॥
स्वैराचारेण संपूज्य त्वहन्तेदन्तयोः समा ।
महाकामकलारूपा ॥

"आनन्दो ब्रह्मेति व्यजानादिति" "एतस्यैवानन्दस्य चान्यान्यानन्दानि मात्रामुपजीवयन्तीति" श्रुत्युक्त्या सर्वानन्दं समष्टिभूतपरानन्दमयत्वात् परब्रह्मात्मके, अत एव परे विश्वोत्तीर्णे परशिवस्यानन्दमयत्वात् चक्रे नवमे संवित्तिरूपा ~~स्वसंवित~~

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

"स्वसंवित् त्रिपुरां देवीं लौहित्यं तद्विमर्शनम् ।"

इत्यभियुक्तोक्तरीत्या वेदकवेद्ययोः शुक्लरक्तयोः समा मध्यस्था संवित्तिर्महात्रिपुरसुन्दरी पूर्वोक्तनिर्वचना, महाकामकलारूपा प्रकाशविमर्शसामरस्यरूपा बिन्दुत्रयमयहार्धकलातद्रूपा "बिन्दुं संकल्प्य वक्त्रं च" इत्यादि चतुःशतीशास्त्रोक्तरीत्या स्वैराचारेण संपूज्या

"यत्र यत्र मनस्तुष्टिर्मनस्तत्रैव धारयेत् ।
तत्र तत्र परानन्दस्वरूपं संप्रकाशते ॥"

इति श्रीविज्ञानभैरवभट्टारकोक्तरीत्या निजेच्छानुरूपैरिन्द्रियप्रीणनैः द्रव्यैः परिस्फुरत्परमानन्दानुसंधानलक्षणेन स्वैराचारेण स्वसंविद्देवता भावनीयेत्यर्थः ॥

प्राप्तिसिद्धिमाह

पीठविद्यादिसिद्धिदा ।
महामुद्रामयी देवी पूज्या ॥

"कापूजाओ" इति क्रमात् इति पूर्वोक्ताः पीठाश्चत्वारः विद्यावाग्भवकामराजशक्तितुरीयबीजात्मका, आदिशब्दाद्देवताः कामेश्वर्याद्याः चतस्रः तेषां तुर्यातीतपदपरशिवविश्रान्तिलयलक्षणां सिद्धिं ददाति प्रापयतीति प्राप्तिसिद्धिः, महामुद्रामयी महामुद्रा सर्वमुद्रासमष्टिभूतत्वात् योनिमुद्रा तन्मयी पूज्येत्यर्थः ॥

पञ्चदशात्मिका ।
तत्तत्तिथिमयी नित्या नवमी भैरवी परा ॥

पञ्चदशात्मिका पञ्चदशाक्षर्या विद्याया वाच्यभूता पञ्चदशभूतगुणात्मिका, तत्तत्तिथिमयी प्रतिपदादिपञ्चदशपदरूपा नित्या निजसुखमयनित्यनिरुपमाकारा, परा नवमी भैरवी परा मूलविद्यामुच्चार्य नवमचक्रेश्वरीविद्याया षोडशकला-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

त्मिका मूलदेवी नवमचक्रेश्वरी पूज्येत्यर्थः ॥

प्रतिचक्रं तु मुद्रास्तु चक्रसंकेतचोदिताः ।

प्रतिचक्रं त्रैलोक्यमोहनादिषु एकैकस्मिन् चक्रे चक्रसंकेतचोदिताः

"योनिः प्रादुर्यतः । सैषा सर्वसंक्षोभिका पुनः ।"

इत्यादिना चक्रसंकेते चक्रे विहिताः, सर्वमुद्राः सर्वसंक्षोभिण्याद्याः तत्तच्चक्रमुद्राः तत्तच्चक्रेषु पूज्या इति योज्यम् ॥

नित्यक्लिन्नादिकाश्चैव काम्यकर्मानुसारतः ।
चतुरश्रान्तराले वा त्रिकोणे वा यजेत सुधीः ॥

कामेश्वरीभगमालिन्योरावरणान्तःपातित्वात् मध्यत्रिकोणस्य वामकोणयोः स्थितिरुक्ता, शिष्टाः

"नित्यक्लिन्ना भेरुण्डा वह्निवासिनी ।
महाविद्येश्वरी दूती त्वरिता कुलसुन्दरी ॥
नित्या नीलपताका च विजया सर्वमङ्गला ।
ज्वालामालिनी चित्रा च ॥"

इति चतुःषष्टीतन्त्रोक्ताः त्रयोदश नित्याः त्रिकोणे वा श्रीचक्रमध्यत्रिकोणे वा चतुरस्रान्तराले वा, काम्यकर्मानुसारतः वश्यादिकाम्यकर्मानुरूपवर्णध्यानमुद्रादिभिः सुधीः तत्तत्काम्यकर्मविधानविषयज्ञः ॥

चक्रपूजामुपसंहरन् कुलदीपनिवेदनमाह

अलिना पिशितैर्गन्धैर्धूपैराराध्य देवताः ।
चक्रपूजां विधायेत्थं कुलदीपं निवेदयेत् ॥
अन्तर्बहिर्भासमानं स्वप्रकाशोज्ज्वलं प्रिये ।

अलिना हेतुना, पिशितधूपगन्धाद्यैः समाराध्याः देवताः त्रैलोक्यमोहनादिबिन्दवान्तरचक्रगताः अलिपिशितगन्ध-

१ क० पु० न्तरेति पाठः ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शाखाः सम्प्रार्थ्याः देवताः त्रैलोक्यमोहनादिबैन्दवान्तचक्रगताः
अलिपिशितगन्धधूपैः सम्पाराध्य इत्थं पूर्वोक्तरीत्या चक्रपूजां वि-
धाय, कुलदीपं कुलं षट्त्रिंशत्तत्त्वसमुदायरूपं शरीरं तत्र दीपं
च "ततो हृदयपद्मान्तः स्फुरन्तीं संविदं कलाम्।"
इत्यभियुक्तोक्तरीत्या हृदयान्तर्भासमानं संवित्कलारूपं दीपं त-
मेवेन्द्रियद्वारा बहिरर्थेषु तद्रूपेणैव स्वप्रकाशोज्ज्वलं तत्र
प्रमाणनिरपेक्षप्रतीतिकं निर्वाणरहितं च निवेदयेत्। पुनः
प्रत्यङ्मुखतया तेनैव द्वारेण अन्तः स्वसंविश्रान्तिस्तन्निवेदनं
नाम ॥

पुष्पाञ्जलिं ततः कृत्वा जपं कुर्यात्समाहितः।

"संयम्येन्द्रियसंचारं प्रोच्चरन्नादमान्तरम्।
एष एव जपः प्रोक्तो न तु बाह्यजपो जपः॥"

इति प्रमाणवचनोक्तरीत्या समाहितो नियतेन्द्रियो नादरूप-
मन्त्रोच्चारलक्षणजपं कुर्यात्। शिष्टं स्पष्टम्॥

जपप्रकारमाह

कूटत्रये महादेवि कुण्डलीत्रितयेऽपि च।
चक्राणां पूर्वपूर्वेषां नादरूपेण योजनम्॥

कूटत्रये कूटानां वाग्भवकामराजशक्तिबीजाख्यानां त्रये,
कुण्डलीत्रितयेऽपि च कुण्डलीत्रयमाधारे

"तत्राधारं च हृत्पद्मबिन्दुस्थानं च परिकीर्तितम्।"

इति स्वच्छन्दसंग्रहोक्तेषु आधारहृदयभ्रूमध्येषु स्थितानां बी-
जत्रयशिखरवर्तिकामकलान्तर्गतसपरार्धकलारूपाणां व-
ह्निसूर्यसोमकुण्डलीनां त्रये चक्राणां पूर्वपूर्वेषां "अकुले वि-
षुसंज्ञे च" इत्यत्रोक्ताकुलादिबिन्दुस्थानेषु नवसु भावितानां
त्रैलोक्यमोहनादिनवचक्राणाम् एकैकस्मिन् बीजे कुण्डलि-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

न्यां च त्रिशस्त्रिशो विभज्य योजितानां नादरूपेण योजनं त्रै-
लोक्यमोहनादिनवचक्रात्मकस्यादित्रयस्य आधारस्थवह्निमण्ड-
लस्थितवाग्भवशिखरवर्त्तिकामकलान्तर्गतहार्धकलारूप-
वह्निकुण्डलिन्युत्थितस्थानोदितहृत्स्थकामराजबीजपर्यन्त-
व्यापिनादमयताभावनावाग्भवबीजजपः। सर्वसौभाग्यदाय-
कादिचक्रत्रयस्य हृदयस्थितसूर्यमण्डलान्तर्गतकामराज-
शिखरवर्त्तिकामकलान्तर्गतहार्धकलारूपसूर्यकुण्डलिन्यु-
त्थानोदितबिन्दुस्थानगतशक्तिबीजपर्यन्तव्यापिनादमयता-
भावना कामराजबीजजपः। सर्वरोगहरादिचक्रत्रयस्य बि-
न्दुस्थानेन्दुमण्डलान्तर्गतशक्तिबीजशिखरवर्त्तिकामकला-
न्तर्गतहार्धकलारूपसोमकुण्डलिन्युत्थानोदितब्रह्मरन्ध्रो-
परिस्थितशिवतत्त्वसमनासीमपर्यन्तव्यापिनादेन सहोन्म-
न्यां लयभावनं शक्तिबीजोच्चारः इति तदुक्तमभियुक्तैः।

चित्ते वाक्पदविस्तरस्य महतः संस्कारशेषा स्थिति-
र्नादोऽसौ तव देवि मूर्ध्नि समनासीमानमुल्लङ्घयन्।
घण्टाक्वाण इव क्रमेण विरमन्नन्त्यां मनीयस्तरा-
माजिघ्रन् परचिद्दृशामनुपमां मूर्तिं पुराणीं समाम्[1]॥

इत्यत्रैवोक्तम्॥

ननु दीपाकारोऽर्धमात्रश्च ललाटे वृत्त इष्यते।
इत्यादि त्रिष्वपि बीजेषु उन्मनीपर्यन्त उच्चारः किमिति नो-
क्तः प्राणादीन् उन्मन्यन्तानां द्वादशानां सर्वत्र साधार-
णत्वेन वक्तुं शक्यत्वादित्यत आह

तेषु प्राणाग्निमायार्णकलाबिन्द्वर्धचन्द्रकाः।
रोधिनी नादनादान्ताः शक्तिर्व्यापिकयान्विता॥

१ क॰ पु॰ मनीयसस्तरामिति पाठः।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

समना चोन्मना चेति द्वादशान्ते स्थिताः प्रिये ।
मूलकुण्डलिनीरूपे मध्यमे च ततः पुनः ॥
सद्गुर्मुखे च विश्वस्य स्थितिरूपे तथेश्वरि ।
केवलं नादरूपेण उत्तरोत्तरयोजनम् ॥
शावलांकारके देवि तृतीये द्वादशी कला ।

तेषु त्रिष्वपि बीजेषु अन्ते शाणे हकारः अग्नी रेफः मायाणीमीकारः ह एव कला । तदुक्तं कामकलाविलासे
"बिन्दुरहंकारात्मा रविरेतन्मिथुनसमरसाकारः ।
कामः कमनीयतया कला च दहनेन्दुविग्रहौ बिन्दू ॥"
इति बिन्द्वादयो नवोन्मन्यन्ताः पूर्वोक्तलक्षणा एते शाणादय उन्मन्यन्ताः द्वादशा स्थिता मूलकुण्डलिनीरूपवाग्भवबीजे
"या मात्रा त्रपुसीलतातनुलसत्तन्तुस्थितिस्पर्धिनी
वाग्बीजे प्रथमे स्थिता तव सदा तां मन्महे ते वयम् । ल्प
शक्तिः कुण्डलिनीति विश्वजननव्यापारबद्धोद्यमा
ज्ञात्वेत्थं न पुनः स्पृशन्ति जननीगर्भेऽर्भकत्वं नराः ॥"
इति लघुस्तवोक्तरीत्या विश्वस्य सद्गुर्मुखे मध्यमे कामरा-
स्य‸ जबीजे विश्वस्थितिरूपे संहाररूपयोर्मध्यस्थत्वात् केवलनादरूपेण नादाद्युन्मन्यन्तावयवोच्चारवर्जं नादरूपेणोत्तरोत्तरयोजनम् उच्चारक्रियाविशेषणं वाग्भवबीजशिखरवर्तिनं नादं हृन्नतकामराजबीजपर्यन्तमुच्चरेत्, कामराजबीजशिखरवर्तिनं नादं बिन्दुस्थानगतशक्तिबीजपर्यन्तमुच्चरेदित्यर्थः । शावलाकारके एतद्बीजद्वयनादाद्युपयोगात् मिश्ररूपे तृतीये शक्तिबीजे, द्वादशी कलोन्मनी स्थितेत्यनुषङ्गः । शाणादयो द्वादशकला अपि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तृतीयबीजशिखरे स्थिता उच्चार्या. इति लभ्यते। कोऽर्थः- यद्यपि वाग्भवकामराजशक्तिबीजानां त्रयाणामपि सन्ते शाणाग्निमायाबिन्द्वर्धचन्द्ररोधिनीनादनादान्तशक्तिव्यापिकासमनोन्मन्यो सह द्वादश कला वक्तुं शक्यन्ते, तथापि वाग्भवकामराजबीजयोः शाणादय उन्मन्यन्ताः, तथापि तयोः सृष्टिस्थितिरूपत्वात् तत्र विश्रान्तीतोन्मनीपर्यन्तमुच्चारः, अतोपि न विरोधः इत्यर्थः ॥

जपकाले भावनामाह

शून्यषट्कं सुरेशानि अवस्थापञ्चकं पुनः।
विषुवत्सप्तरूपं च भावयन् मनसा जपेत् ॥

एतानि विद्यावयवेषु भाव्यानि

"त्रिखिपञ्चचित्ररूपैर्मण्डलैः शून्यपञ्चकम्।
ध्यायतोऽनुत्तरे शून्यं परं व्योमतनुर्भवेत् ॥"

इति विज्ञानभट्टारकोक्तरीत्या शून्यषट्कस्य रूपं ज्ञेयम्। अवस्थापञ्चकं जाग्रत्स्वप्नसुषुप्तितुर्यतुर्यातीतात्मकं। जाग्रदादीनां स्वरूपं वक्ष्यति। विषुवत्सप्तरूपं च वक्ष्यति।

शून्यानां स्थानानि स्वरूपाणि क्रमेणाह

अग्न्यादि हादशान्तेषु त्रींस्त्रीँस्त्यक्त्वा वरानने।
शून्यत्रयं विजानीयादेकैकान्तरतः प्रिये ॥

एकस्य एकस्य द्वयोर्द्वयोरन्तर इत्यर्थः। अग्न्यादि अग्नीरेफः तदादि त्रीन् त्रीन् षट् त्यक्त्वा, शून्यत्रयं षट् शून्यानि विजानीयात्। कोऽर्थः- हकारमायाक्षरयोः मध्ये रेफं, मायार्धचन्द्रयोर्मध्ये बिन्दुम्, अर्धचन्द्रनादयोर्मध्ये रोधिनीं, नादशक्त्योर्मध्ये नादान्तं, शक्तिसमनयोर्मध्ये व्यापिकां, समनोर्ध्वे उन्मनामिति षट् त्यक्त्वा तत्र रेफबिन्दु-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

रोधिनी नाद शून्य व्यापिकाख्यस्थानेषु पञ्चसु "क्षितिपञ्चवि-
ग्रहपैरित्यादि पूर्वोक्तरीत्या वह्निवर्हगतचन्द्रकसहस्राह-
पाति पञ्चशून्यानि भावनीयानीत्यर्थः। षष्ठोन्मनाख्यस्थाने तु
"पञ्चव्योमतनुर्भवेदिति" विज्ञानभैरवभट्टारकोक्तरीत्यैव व्यो-
मतनुः शून्यं ज्ञेयमित्यन्यः पाठः ॥

शून्यत्रयात् परे स्थाने महाशून्यं विभावयेत् ॥

परे स्थाने शून्यं निराकारं भावयेदित्यर्थः ॥
इदानीमवस्थापञ्चकभावनां क्रमोपरि वक्ष्यन् आदौ जा-
ग्रदवस्थाभावनामाह

प्रबोधकारणस्याद्य जागरत्वेन भावनम् ।
वह्नौ देवि महाजाग्रदवस्था त्विन्द्रियद्वयैः ॥

इन्द्रियद्वयैः ज्ञानकर्मेन्द्रियैर्दशभिर्जाग्रद्व्यवहारः, जाग-
रणं प्रबोधो जागर इत्युच्यते। तत्कारणस्य प्रकाशस्य जा-
गरत्वेन भावनम् अतः प्रकाशके वह्नौ तार्तीयबीजव-
र्तिनि रेफे महाजाग्रदवस्था सार्वकालिकनिद्रालयलक्षण
परप्रबोधदशा भावनीयेत्यर्थः ॥
स्वप्नभावनामाह

आन्तरैः करणैरेव स्वप्नमायावबोधनः ।
गलदेशे ॥

बाह्येन्द्रियविरतैः आन्तरैः करणैर्मनोबुद्ध्यहंकारचित्ता-
ख्यैरेव व्यवहारः प्रमातुः स्वप्नः, स्वप्नमाया तार्तीयस्था-
ने चतुर्थस्वरेणावगतबोधनः तद्वाच्य इत्यर्थः। गलदे-
शे स्वप्नस्य स्थानम् ॥
सुषुप्तिभावनामाह

सुषुप्तिस्तु लीनपूर्वस्ववेदनम् ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

अन्तःकरणवृत्तीनां लयतो विषयस्य च ।
पूर्ववर्णानां विलोमेन भ्रूमध्ये बिन्दुसंस्थिता ॥

स्वप्ने विद्यमानानामन्तःकरणवृत्तीनां लयतः सर्वेन्द्रियोपरतिः सुषुप्तिरिति लक्षणं । यतो हि लीनपूर्वस्य देहादिषु क्रोडीकृतस्य तस्य लीनस्येव स्थितस्य स्वस्यात्मनो वेदनं प्रकाशनं भवति "सुखमहमस्वाप्समिति" हि पश्चात् सुखमयं स्वात्मरूपं परामृश्यते । सेयं सुषुप्तिः विषयस्य तु विषयं तार्तीयं बीजं विश्वव्याप्तिस्थानत्वात् तस्य पूर्ववर्णानां विलोमेन

"मायाबीजं महेशानि सादनं चक्रसंयुतम् ।
इन्दुबीजं केवलं तु ॥"

इत्यादि

"संहारक्रमयोगेन शक्तिबीजं समुद्धरेत् ।"

इत्थं न चतुःशतीशास्त्रोक्तरीत्या संहारक्रमोद्धृतानां शक्तिबीजवर्णानां विलोमक्रमेण परिपाट्या भ्रूमध्ये बिन्दुसंस्थिता भ्रूमध्यस्थानस्थितसुषुम्नोर्ध्वबिन्दौ स्थिता भावनीयेत्यर्थः ॥

तुरीयभावनामाह

तुर्यरूपं तस्य चात्र वृत्तार्धादेस्तु संग्रहः ।
चैतन्यव्यक्तिहेतोस्तु नादरूपस्य वेदनम् ॥

चैतन्यस्य संविदो व्यक्तेः परामर्शस्य हेतोः नादरूपस्य पूर्वोक्तलक्षणस्य वेदनमभिव्यक्तिः तुरीयरूपं तस्य तुरीयरूपस्य अत्र तार्तीयबीजे वृत्तार्धादेः वृत्तार्धमर्धचन्द्रः आदिशब्दाद्बोधिनीनादौ गृह्येते तेषां संग्रहः तार्तीयबीजशिखरवर्त्यर्धचन्द्रबोधिनीनादेषु स्वात्मचैतन्याभिव्यक्तिकारणनादकलनात्मकं तुरीयं तुर्यं भावनीयमित्यर्थः ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तुर्यातीतभावनामाह ।

तुर्यातीतं सुखस्थानं नादान्तादिस्थितं प्रिये ।
अत्रैव जपकाले तु पञ्चावस्थाः स्मरेद् बुधः ॥

तुर्यातीतं,

"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दो ब्रह्मणो विद्वान् ॥"

इत्युपनिषदुक्तरीत्या मनोतीतपरानन्दस्वरूपं सुखस्थानं नादादिस्थितं विलोमक्रमेणैव सुखस्थानस्थितं नादान्तशक्तिव्यापिकासमनोन्मनासु तुर्यातीतं भावनीयमित्यर्थः । अत्रैव शक्तिबीजएव पञ्चावस्थानुसंधानपुरःसरं विद्याजपकरणावधाननिपुणः ॥

इदानीं मन्त्रविषुवभावनां विवक्षन्नादौ प्राणविषुवभावनामाह

योगः प्राणात्ममनसां विषुवं प्राणसंज्ञकम् ।

प्राणस्य ककारात्मनो वायोः आत्मनो यष्टुः मनसश्च संयोगः प्राणविषुवमित्युच्यते । तदुक्तं स्वैरतन्त्रे

"त्रिध्यात्मप्राणमनसां संयोगं प्राणकं विदुः ।"

इति ॥

मन्त्रविषुवभावनामाह

आधारोत्थितनादे तु लीनं बुद्ध्यात्मरूपकम् ।
संयोगेन वियोगेन मन्त्राणां महेश्वरि ॥
अनाहताद्याधारान्तं नादात्मत्वविचिन्तनम् ।
विषुवम् ॥

आधारात् मूलाधारादुत्थितेन वायुना नादे बिन्द्वादिशिखरवर्तिनि आत्मरूपकमात्मनोऽस्पष्टं रूपं संविदात्मकं लीनं नादेनैकरसीभूतं बुद्ध्वा मन्त्राणां वाग्भवकामराजशक्तिबीजानां वियोगेन व्यासरूपेण संयोगेन तरी-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

घबीजेन च अनाहतान्ताधारान्तम् अनाहतं हृदयस्थानम् आधा-
राणां सर्वेषां मन्त्रस्थानं ब्रह्मरन्ध्रं तत्पर्यन्तं मन्त्रान्तःपादलवे-
णोच्चारितः अनाहतान्ताधारान्तमिति यावत् । नादात्मत्ववि-
चिन्तनं नादस्य षट्हृत्त्वविभावनः विषुवं मन्त्रसंज्ञकमिति शे-
षः । कोऽर्थः । मूलाधारस्थितवाग्भवशिखरवर्तिनं नादं हृ-
दयपर्यन्तमुच्चार्य तत्र स्वयं लीनो भूत्वा स्वात्मतयानुसंधानं
मन्त्रविषुवमित्यर्थः । तदुक्तं शैवतन्त्रे

“आत्मनो नादमध्ये तु लयं संचिन्त्य मन्त्रतः ।
अकारोकारवर्णादिसंयोगेन वियोगतः ॥
हृदयादिबिल्वान्तं च विषुवं मन्त्रसंज्ञकम् ॥”

इति ॥

नाडीविषुवभावनामाह

नादसंस्पर्शान्नाडीविषुवमुच्यते ।
द्वादशग्रन्थिभेदेन वर्णान्नाड्यन्तरे प्रिये ॥

वर्णबीजत्रयशिखरवर्तिकामकलाक्षरात् द्वादशग्रन्थिभे-
देन मूलादिषट्चक्रग्रन्थीन् भित्त्वा तेन नाड्यन्तरे सुषुम्ना-
मध्यमार्गेण नादसंस्पर्शात् त्रिबीजशिखरवर्तिनो नादस्य
मूलात् ब्रह्मरन्ध्रान्तमुच्चारतः संस्पर्शात् नाडीविषुवमुच्य-
ते । तदुक्तं शैवतन्त्रे

“स्थूलमन्त्रत्रिशूलेन भित्त्वा ग्रन्थीननुक्रमात् ।
नादनाडीसमायोगान्नाडीविषुवभावनम् ॥”

इति ॥

प्रशान्तविषुवभावनामाह

नादयोगः प्रशान्तस्तत्प्रशान्तेन्द्रियगोचरम् ।
वह्निं मायां च कालं च चेतनामर्धचन्द्रकम् ॥
रोधिनीनादनादान्तान् शक्तौ लीनान् विभावयेत् ॥

वह्निं रेफं, मायामीकारं, कालं तन्मध्यवर्तिसपरार्धकला-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

संबन्धिरेखायां, चेतनां बिन्दुः वेद्यस्य संस्कारः वेदनरूपत्वात्।
तदुक्तं पराप्रवेशिकायाम्

"बिन्दुर्वेद्यस्य संस्कारो विसर्गः सर्गमित्यसौ ।

इति। अर्धचन्द्ररोधिनीनादनादान्ताः पूर्वोक्तलक्षणाः शक्तौ पूर्वोक्तलक्षणायां लीनान् विभावयेत्, यतोयं प्रशान्तो नादयोगो यदुक्तदनीतशक्तिलयलक्षणः, अतः प्रशान्तेन्द्रियगोचरं सकलेन्द्रियातीतविषयं तत्प्रशान्तविषुवमित्यनुषङ्गः। तदुक्तं शैवतन्त्रे

"अकारोकारवर्णौ च मकारं बिन्दुमेव च ।
नादनादान्तसंज्ञे तु त्यक्त्वा ब्रह्मादिभिः क्रमात् ॥
सप्तमे शक्तिमध्ये तु शिवात्मानं विचिन्तयेत् ।
प्रशान्तं तद्विजानीयात्प्रशान्तेन्द्रियगोचरम् ॥"

इति ॥

शक्तिकालविषुवयोर्भावनामाह

विषुवं शक्तिसंज्ञे तु तदूर्ध्वे नादचिन्तनम् ।
तदूर्ध्वं कालविषुवमुन्मनान्तं महेश्वरि ॥

तदूर्ध्वं शक्तेरूर्ध्वं समनान्ते नादस्य चिन्तनं शक्तिविषुवम्, तदूर्ध्वं समनाया अपि ऊर्ध्वं तत्र कलाध्यानमिति स्वच्छन्दसंग्रहोक्तरीत्या कालातीतोन्मनान्तं नादस्य चिन्तनं कालविषुवं तदुक्तम्

"शक्तिमध्यगतो नादः समनान्तं प्रसर्पति ।
तच्छक्तिविषुवं प्रोक्तमुन्मन्या कालसंज्ञितम् ॥"

इति ॥

ननु कियता कालेन नादतत्त्वं प्रोद्यन्तीत्याह

मुनिचन्द्राष्टदशभिस्त्रुटिभिर्नादवेदनम् ।

"स्वस्थे नरे समासीने यावत्स्पन्दति लोचनम्।
इति तस्य त्रिंशत्तमो भागस्त्रुटिः परिकीर्तितः ॥"

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तत्परस्य प्रान्तांशस्तु त्रुटिरित्यभिधीयते ।"

इति तन्त्रान्तरोक्तरीत्या निमेषस्य त्रिसहस्रतमो भागस्त्रुटिः। पुनश्च: सप्त, चन्द्र एक:, शब्दस्पर्शसंख्ये प्रसिद्धे तेन हका-राद्युन्मन्यन्तानां विद्यावयवानां सप्तदशाधिकाष्टदशोत्तर-सहस्रत्रुटिभिरुच्चारे "सकले विषुसंज्ञे च" इत्युक्तरीत्या कृते सति नादस्यान्ते तत्त्वस्य वेदनमित्यर्थः ॥

तत्त्वविषुवंभावनामाह

चैतन्यव्यक्तिहेतुश्च विषुवं तत्त्वसंज्ञकम् ।

चैतन्यस्य स्वात्मतत्त्वस्य व्यक्तेः प्रकाशहेतुः तत्त्व-विषुवम्। कोऽर्थः—उन्मनीर्ध्वान्तरोक्तसंज्ञाव (?) त्रुटिभिः नादलयात् स्वात्मानुसंधानं तत्त्वविषुवमित्यर्थः। तदुक्तं प्रोक्तवत्वे

"स्वाधिकारे परे धाम्नि विषुवं तत्त्वसंज्ञकम् ॥"

इति ॥

परं स्थानं महादेवि निसर्गानन्दसुन्दरम् ।

परं शून्यषट्कावस्थापंचकसप्तविषुवकोलाहलातीतं स्था-नं विश्वविश्रान्तिभूमित्वात् निसर्गानन्दसुन्दरं सर्वविषया-नन्दसमष्टिभूतः परानन्दो निसर्गानन्दः, अत एवानित्या-शुचिदुःखानात्मभेदप्रपञ्चपरिपन्थिपराकरणपरत्वात् परानन्द-लक्षणपरप्रेमास्पदपरमशिवरूपनिसर्गानन्दसुन्दरमित्यर्थः॥

पूर्वोक्तभावनायाः फलमाह

एवं चिन्तयमानस्य जपकालेषु पार्वति ।

सिद्धयः सकलास्तूर्णं सिध्यन्ति त्वत्प्रसादतः ॥

एवं पूर्वोक्तप्रकारेण जपकालेषु जपः "आत्मान्तं सकलं प्रोक्तम्" इत्यादि पूर्वोक्तरीत्या सकलनिष्कलकेवलनिष्कल-रूपाः त्रिविधा जपाः, तेषां कालाः "दीपाकारोऽर्धमात्रश्चे"-त्यादिना पूर्वोक्तविद्यावयवानामुच्चारणकालाः, तेषु सू-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

न्यबद्धादि विचिन्तयमानस्य सकलाः सिद्धयोऽणिमाद्याः पूर्वोक्ताः त्वत्प्रसादतः सिद्ध्यन्ति । प्रकाशात्मनो मम विमर्शशक्तौ त्वयि प्रसन्नायां

"तव तन्त्रागमार्गेण चैतन्यं व्यज्यते प्रभोः ।"

इति विज्ञानभैरवमहारकोक्तरीत्या सर्वप्रत्ययसघतामुपगतानां तव प्रसादात् स्वायत्ता भवतीत्यर्थः ॥

एवं कृत्वा जपं देव्या वामहस्ते निवेदयेत् ॥

एवमुक्तभावनापुरस्सरं जपलक्षणं कृत्वा प्रकाशविमर्शसामरस्यरूपाया वामहस्ते विश्वकवलीकारपरे विमर्शमये निवेदयेत् ॥

पूजाविधिमुक्त्वा तर्पणविधिमाह

अनामाङ्गुष्ठयोगेन तर्पयेच्चक्रदेवताः ॥

अनामा शक्तिरङ्गुष्ठः शिवः तद्योगेन मेलनेन शिवशक्तिमेलापनमुद्रयेत्यर्थः । चक्रदेवताः चतुरस्रादिबिन्द्वन्तनवचक्रनिवासिन्यः प्रकाशविमर्शसमरसीभूताः

"नोदनैस्तर्पणं सम्यग्विशुद्धैरमृतात्मभिः ।
महाहन्ता करोमीदं विश्वहव्यवपुर्धरम् ॥"

इत्यभियुक्तोक्त्या परस्मिन् लयं भावयेदित्यर्थः ॥

तर्पणसाधनानि वस्तून्याह

हव्यं सामं तथा हत्स्यं देव्ये तु विनिवेदयेत् ॥

शिवशक्तिमेलनमुद्रया समस्तहव्यसामहत्स्यानां निवेदनमेव तर्पणमिति भावः ॥

समयस्थैनेव सह पूजयेदित्याह

कौलिकाचारसंयुक्तैर्वीरैस्तु सह पूजयेत् ।

कुलमुक्तलक्षणं हेयतया ज्ञेयं यैः तैः कौलिकाः दक्षिण-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

विशेषतस्तु दीक्षितास्ते, वामाचाराः

"गुरुभक्तिश्च शान्तिश्च पूजा श्रद्धा क्षमा धृतिः ॥"

इत्यादिस्वच्छन्दसंग्रहोक्तविशेषैर्विहितः तदुक्तं वीरैः

"अहमेव प्रलयं कुर्वन्निदमः शेते योगिनः ।"

इति पराप्रवेशिकोक्तरीत्या भेदप्रतीतिशमनरूपवेदान्तादिपरैः अहमिति रणाङ्गने प्रलयप्रतिपादनपरैः सह पूजयेत् ।

"तन्त्राचारपरिभ्रष्टैः प्रपञ्चव्रतशालिभिः ।
पशुभिः क्षुद्रकर्मस्थैर्न कुर्याद्द्रव्यभोजनम् ॥"

इत्यादिवचनसिद्धैः सह न पूजयेदित्यर्थः ॥

ननु कस्मिन् नक्षत्रे कस्मिन्वारे कस्मिन् दिने पूजा कार्येत्यत आह

पुष्यभेन तु वारे च सौरे च परमेश्वरि ।
गुरोर्दिने स्वनक्षत्रे चतुर्दश्यष्टमीषु च ॥
चक्रपूजां विशेषेण योगिनीनां समाचरेत् ।

"नित्यं संपूजयेद्देवीं साधनां सावृतिं क्रमात् ।"

इति स्वच्छन्दसंग्रहादिशास्त्रेषु प्रतिदिनं पूजा विहिता । तथाहि पुष्यभेन पुष्यनक्षत्रेण सह सौरवारे गुरुदयव्याप्तौ दिने स्वनक्षत्रे च चतुर्दश्यष्टमीषु तिथिषु चक्रपूजां चतुरस्रादिबिन्द्वन्तचक्रगतानां देवतानां पूजां विशेषेण समाचरेत् । नित्यपूजा तु न भवति, किंतु नैमित्तिकतया अष्टाष्टकादियोगिनीगणं प्रीणनपुरःसरं पूजयेदित्यर्थः ॥

चक्रे अष्टाष्टकपूजनं कथं संपूज्यते इत्याशङ्कामपनुदन् विशेषपूजामेव विवृणोति

चतुःषष्टिर्यतः कोट्यो योगिनीनां महौजसाम् ।
चक्रमेतत् समाश्रित्य संस्थिता वीरवन्दिते ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अष्टाष्टकं तु कर्तव्यं वित्तशाठ्यविवर्जितम् ।

त्रैलोक्यमोहनचक्रनिवासिनीनां ब्राह्म्यादीनामंशभूताः अक्षोभ्याद्याश्चतुःषष्टियोगिन्यः तासां प्रत्येकमंशभूतानां कोटिकोटिसंख्याकानां महोन्नतानां महाप्रभावशालिनीनां योगिनीनामुक्तलक्षणानामिति उक्तत्वात् चतुःषष्टिकोट्यो यतः चक्रमेतत् समाश्रित्य संस्थिता मध्यमभूगृहान्तः चतुःषष्टिकोट्यो टियोगिनीसमष्टिभूतानाम् अक्षोभ्यादीनामष्टाष्टकानां मष्टानामष्टकं, वित्तशाठ्यविवर्जितं स्वस्वविभववञ्चनाहीनं यथा भवति तथा कर्तव्यं द्रष्टव्यं पूजितक्रियायोगेभिप्रेतः ॥

ननु तासां पूजने किमायातं भवेत्यत आह

त्वमेव तासां रूपेण क्रीडसे विश्वमोहिनी ॥

प्रकाशात्मनो मम विश्वबोधकस्य अंशभूता विमर्शरूपिणी त्वमेव बैन्दवचक्रगता विश्वमोहिनी संसारित्वोपपादनकारिणी तासां ब्राह्म्यादीनामक्षोभ्यादीनां च रूपेण क्रीडसे "एका सती भगवती परमार्थतोऽपि
संदृश्यसे बहुविधा ननु नर्तकीव।"
इत्यभियुक्तरीत्या तद्रूपेण परिणमसे अतस्त्वदंशभूतयोगिनीपूजनेन त्वमेव प्रीणासीत्यर्थः ॥

ननु व्युत्पत्तिबलादेव आगमार्थमवगम्य तत्तन्त्रोचितपूजादिषु प्रवृत्तिः स्यात् किं गुरूपदेशेनेत्याशङ्क्याह

अज्ञात्वा तु कुलाचारमदृष्ट्वा गुरुपादुकाम् ।
योऽस्मिन् शास्त्रे प्रवर्तेत तं त्वं पीडयसि ध्रुवम् ॥

"स्वप्रकाशशिवमूर्तिरेकिका तद्विमर्शतनुरेकिका तयोः।
सामरस्यवपुरिष्यते परा पादुका परशिवात्मनो गुरोः॥"
इत्यभियुक्तरीत्या त्रिविधामदृष्ट्वा गुरोरविदित्वा कुलाचारं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कुलकौलिकदर्शने तत्राचारः स्वच्छन्दसंग्रहादिशास्त्रे विहितः, तं गुरुमुखादविज्ञाय योऽस्मिन् शास्त्रे पूर्वोक्तपरमहितपरदेवतायजनपरमार्थसाधके प्रवर्तेत तदुक्ताचरणपरो भवेत् . तं चुम्बकं साधकं मांसमज्जादिशोषणादिरूपेण पीडयन्ति गृह्णाति ध्रुवं नात्र शङ्का । अतो गुरुमुखादेव अखिलार्थान् अवगम्य अस्मिन् शास्त्रे प्रवर्तितव्यमन्यथा निष्फलं स्यादित्यर्थः ॥

एवं ज्ञात्वा वरारोहे कौलाचारपरः सदा ।
आवयोः शवलाकारं देवि तच्च निवेद्य च ॥
त्वत्स्वधाप्रसराकारास्त्वमेव परिभावयेत् ।

"वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी" इति निघण्टुः । एवमुक्तप्रकारेण ज्ञात्वा गुरुमुखादेव कौलाचारपरः, कौलिकाः पूर्वोक्तलक्षणाः तेषां विहितः स्वच्छन्दसंग्रहादिशास्त्रेषु आचारः सदा तदनुष्ठानपरः आवयोः प्रकाशविमर्शात्मनोः शवलाकारं

"सुधा शक्तिः शिवो ह्यात्मानन्दो मोक्ष उच्यते।"

इत्यभियुक्तरीत्या सामरस्यापादनरूपं तत् पूर्वोक्तरीत्या शोधितममृतीकृतं तं मद्यं निवेद्य आवयोरित्येव योज्यं । त्वत्स्वधाप्रसराकारः, तव विमर्शशक्तेः स्वधा प्रस्यन्दः तत्प्रसारः तद्भूता आकारा आसामावरणदेवतानां ताः तथाविधास्त्वमेव त्वदन्यतोऽपृथग्भूताः परिभावयेत् ।

"मूलोद्भवं शक्तिचक्रं यतस्तन्मयतां गतम् ।
तस्मिन्नेवाव्यये धाम्नि विलीनं परिभावयेत् ॥"

इत्यभियुक्तोक्त्या विमर्शशक्तेः विलासभूता ह्याकारा याः ता आवरणदेवताः तत्रैव विलीना भावयेदित्यर्थः ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्वामिच्छाविग्रहां देवीं गुरुरूपां विभावयेत् ।
शेषं गुरोर्निवेद्यापि पश्चादात्मनि योजयेत् ॥

देवीं विमर्शरूपिणीं विश्वानुजिघृक्षागृहीतलीलाविग्रहामिच्छाविग्रहामित्यर्थः । त्वामेव गुरुरूपां विभावयेत् तद्वत्तु त्वद्रूपस्य गुरोः निवेद्य शेषं देवतागुरुनिवेदितशेषमात्मनि योजयेत्, यावत्साधकस्ताभ्यां समरसीभवति तावच्छेषं स्वयमुपभुञ्जीतेत्यर्थः ॥

बलिनिवेदनमाह

योगिनीनां महादेवि बटुकायात्मरूपिणे ।
क्षेत्राणां पतये मह्यं बलिं कुर्वीत हेतुना ॥

योगिनीनां पूर्वोक्तरीत्या अंतर्मानमेयमरीचीनामात्मरूपिणे परमात्मस्वरूपिणे बटुकाय क्षेत्राणां पतये, क्षेत्राणि शरीराणि तेषां पतिः जीवात्मा तस्मै मह्यमहन्ताविष्टाय हेतुना हव्येन सद्वितीयेन बलिं कुर्वीत "श्वासद्वयनिरोधेन कुण्डलिनीत्रयसर्जनात् । यज्जीवशिवयोरैक्यं तेनाहावान्तरो बलिः ॥" इत्यस्मदुक्तरीत्या सद्वितीयहव्यस्वीकरणेनोल्लसिते मनसि स्वत एव प्राणापानयोः संचारे प्रान्ते त्रित्वलक्षणे भेदे शिवोहमस्मीति स्वान्तरो बलिरित्यर्थः ॥

ततः स्वैराचारपरो भूयादित्याह

पिबन्नित्यं वमन् खादन् स्वेच्छाचारपरः स्वयम् ।
अहन्तेदन्तयोरैक्यं भावयन् विहरेत् सुखम् ॥

नित्यं प्रत्यहं पिबन् गुरुदेवतानिवेदितशेषं हेतुं, खादन् खाद्यं, वमन् तद्द्वयमिति सामर्थ्यलभ्यं स्वेच्छाचारपरः

"यत्र यत्र मनस्तुष्टिर्मनस्तत्रैव धारयेत् ।
तत्र तत्र परानन्दस्वरूपं संप्रकाशते ॥"

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

इति विज्ञानभैरवोक्त्या स्वस्य यत्रेच्छा जायते तत्तदेव शास्त्रविहितं, यत्र यत्र स्वेच्छा न जायते तत्तदेव शास्त्रनिषिद्धं च; अतः स्वेच्छानुकूलपदार्थान् भावयेत्; तत्प्रतिकूलपदार्थान् परित्यजेदित्यर्थः। अहंतेदन्तयोरैक्यं भावयन्, अहन्ता ज्ञातृधर्मः, इदन्ता ज्ञेयधर्मः, तयोरैक्यं "यत्र यत्र मिलिता मरीचयः" इत्यादिपूर्वप्रतिपादितरीत्या ज्ञातृज्ञेयचैतन्ययोः समरसीकरणलक्षणं ज्ञानं तदेवाहमिति भावयन्, सुखं विहरेत् परिपूर्णज्ञानानन्दो भवेदित्यर्थः। तदुक्तं विज्ञानभैरवभट्टारके

"जग्धिपानकृतोल्लासरसानन्दविजृम्भणात्।
भावयेद्भरितावस्थां महानन्दस्ततो भवेत्॥"

इति॥

परमप्रकृतमुपसंहरति

एतत्ते कथितं दिव्यं संकेतत्रयमुत्तमम्।

सुव्रत॥

सर्वज्ञानोत्तमत्वादत्यन्तगोपनीयमित्याह

गोपनीयं प्रयत्नेन स्वगुह्यमिव सुव्रते।

यथा स्वगुह्यं योनिं परपुरुषेभ्यो गोपयसि प्रयत्नेन तथैतदपि संकेतत्रयमनर्हेभ्यो गोपनीयमित्यर्थः॥

ननु केऽनर्हा येभ्यो गोपनीयमित्यत आह

चुम्बके ज्ञानलुब्धे वा न प्रकाश्यं त्वयानघे।

भक्तिहीनोऽन्यत्रासक्तः तत्तत्स्तवेषु विद्यामात्रपाठी चुम्बकः, ज्ञानलुब्धो विद्यासाधारण्यात् काव्यनाटकादिविद्यावत् अत्रापि ज्ञानं संपाद्यमिति मन्वानः, तयोः द्वयोरपि इदं रहस्यं त्वया न प्रकटीकरणीयमित्यर्थः॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

विध्यतिक्रमणादन्यायो न करणीय इत्याह

अन्यायेन न दातव्यं नास्तिकानां महेश्वरि ।

विध्यतिक्रम एवान्यायः नास्ति परलोक इति मन्यन्ते ये बौद्धादयः ते नास्तिकाः ॥

नन्वत्र को विधिरित्यत आह

एवं त्वयाहमाज्ञप्तो मदिच्छारूपया प्रभो ।

प्रभो जगत्प्रवृत्तिनियमात् प्रभावशालिनि अत एव

"आज्ञया विना शिवे हंसो नामधाम न विद्यते ।"

इति चतुःशतीशास्त्रोक्तरीत्या त्वया विनाहं किमपि कर्तुं वक्तुं न समर्थः तन्मदिच्छारूपया मम अखिलेश्वरस्य आगमशास्त्रवक्तुरिच्छारूपया नाश्रितकल्पया आज्ञप्तः प्रेरितो ज्ञानमेवमुक्तलक्षणं प्रोक्तवानस्मि, अतो भवदाज्ञैव विधिरित्यर्थः ॥

अतस्तदतिक्रमे महद्विघ्नं स्यादित्याह

अन्यायेन तु यो दद्यात् स परेतो भविष्यति ।

अन्यायेन त्वदाज्ञाविधिमुल्लङ्घ्य लुब्धकादिभ्यो य एतज्ज्ञानं दद्यात् स परेतो भविष्यति ॥

एतत्परिज्ञानफलमाह

संकेतं योऽभिजानाति योगिनीनां भवेत्प्रियः ।

एतत्संकेतत्रयं गुरुमुखादेव योऽभिजानाति स योगिनीनां योगः परशिवः तस्यानन्तशाक्तित्वात् तदुक्तं तन्त्रान्तरे

"शाक्तयोऽस्य जगत् कृत्स्नं शक्तिमांस्तु महेश्वरः ।"

इति ॥

ननु परशिवतादात्म्ये कः पुरुषार्थ इत्यत आह

सर्वेप्सितफलप्राप्तिः सर्वकाम्यफलप्रदः ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यतः सर्वेषां जनानां काम्यानां काम्यमानानां फलानां आश्रयः परशिवः, यतः सर्वेषां यानीप्सितानि स्पृहणीयानि फलानि तेषां प्राप्तिः परशिवतादात्म्यपरिज्ञानात् भवति, स एव परमपुरुषार्थ इत्यर्थः ॥

ननु कुतोऽत्र दृश्यते इत्यत आह

यतोऽपि दृश्यते देवि ।

यतो यत्र कुत्रापि बहिरन्तर्वा मनोरतिः तत्र तदनुभवरूपेण स एव दृश्यते तस्य सर्वगतत्वात् । तदुक्तं विज्ञानभैरवभट्टारके

"यत्र यत्र मनो याति बाह्ये वाभ्यन्तरेऽपि च ।
तत्र तत्र शिवावस्था व्यापकत्वात् क यास्यति ॥"

इति तथा

"तत्र तत्राक्षमार्गेण चैतन्यं व्यज्यते प्रभोः" ॥

इति ॥

ननु किं सर्वेणाप्येवं दृश्यते इत्यत आह

कथं विज्ञो न चिन्तयेत् ।

सत्यं दृश्यते तथा न पश्यति "न मां पश्यति कश्चन" इत्युपनिषदुक्तरीत्या

ताम् "प्रत्यग्गोचरं देवं लोकं चान्धं प्रमादिनम्[1] ।
दृष्ट्वा श्रुतिः शिरस्ताडमत्र रोदिति दुःखिता ॥"

इति तन्त्रान्तरोक्तरीत्या दृश्यमानमप्युपदेशहीना न पश्यन्ति "निष्कलत्वं शिवे बुद्ध्वा" इति निष्कलपरशिवतादात्म्यपरोक्षानुभवशाली गुरुकटाक्षावेक्षणत्रुटितपाशजालः परस्फुरत्परमशिवाहन्ताविज्ञानः कथं न चिन्तयेत् सर्वत्र तद्भावं कथं न पश्येदित्यर्थः ॥

१ क० पु० चान्धं प्रमाद्यतामिति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शिवेनात्र रहस्यत्वादविस्पष्टतयोदितम् ।
तदूहनाद्यं वचनादिहैतत् मौनमस्त्व तत् ॥

इति श्रीमत्परमहंसयोगीन्द्रपुण्यानन्दशिष्यामृतानन्दनाथपरमहंसयोगिप्रवरविरचितायां योगिनीहृदयदीपिकायां पूजासंकेतो नाम तृतीयः संकेतः ॥

समाप्ता चेयं योगिनीहृदयटीका ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry